तृत्वंमुख्यत्वान्नसातस्यफलदातृत्वंगतिसद्भावात्॥नहुतस्तुच्चस्यापिगतिसद्भावात्फलदातृ
त्वं किलाक्षितिजावत्॥इतिचेदस्तु॥तर्हिकिंतु॥हियस्मात्कारणात्तदुच्चंचिरं
विनाग्रहणाग्रहपदेग्रहपंक्तौनानिवेशितंनस्थापितं॥उच्चस्यत्रभवराशावान्नफलदा
नत्वमितिभावः॥एवंचंद्रोच्चस्यफलदृत्तभागमात्रान्तरेणस्यगोलयुक्त्यापिदूषयति॥
किंचगोलगणितानियन्महीमध्यकेंद्रमधिकृत्यसतेनिरे॥नहुतःशृंगोन्नतीक्ष्यतेस्फुटंच्यु
च्चहेतुमपिपातवर्त्मनि॥१०॥किंचमुख्यत्वेनरेपापिदूषणमस्ति॥यद्गोलगणिताद्दृनिक
क्षावृत्तादीनिमहीमध्यकेंद्रंमहदृत्तमध्यं॥दृत्तस्यमध्यंकिलकेंद्रमुक्तमितिसिद्धांतोक्तः॥
तदधिकृत्यग्राह्यंस्यन्नहुतस्तानिनिरे॥विस्तृतानिकर्मकर्तृरूपं॥यतःसर्वेषांकक्षावृत्त
नाडिकावृत्तादीनांमध्यंभगर्भएवनहुतस्तस्मिन्भगर्भेस्थितोनरःपातवर्त्मनिपतितमा
गच्छन्तंस्फुटंशृंगोन्नतंमुच्चेहेतुमीक्ष्यतेपश्यति॥अपिरेवार्थे॥विगतंउच्चेहेतुर्यस्या
सौतथा॥उच्चहेतुर्विनापीत्यर्थः॥एतदुक्तंभवति॥फलसंख्याकक्षावृत्तस्यभगर्भेमध्ये॥

प्रतिवृत्तस्यमध्यंग्रहगर्भादिस्फुटफलमानयेत्।।तत्रप्रतिवृत्तेमध्यमचंद्रस्तदुच्चंच।।तन्मध्येचंद्रकेंद्रं।।कक्षावृत्तेस्फुटश्चंद्रः।।तत्रैवनतसंज्ञंच।।उक्तंच।।चंद्रस्यकक्षावलयेहिपातइति।।अतोऽग्रगर्भस्थंदृष्टाकक्षावृत्तेस्फुटंचंद्रंपश्यंति।।तत्रैवनतसंज्ञं।।अतोऽनयोरेकवृत्तत्वाच्चंद्रनतोननतसार्द्ध दृस्या
पिफलदातृत्वं।।नतूच्चस्य।।अतऊर्ध्वमुच्चंग्रहेनुमितिं।।एतद्ग्रंथकृतोक्तंजनानांभ्रमोहननिमित्तं।।वा
स्तवंतुननतेदृश्यं।।तथाहियद्यपिप्रतिवृत्तस्यनीचोच्चवृत्तस्थंतथापयदुच्चस्थंनतंतदेवोच्चमिष्यतेनास्ति।।न
थाऽप्युच्चग्रहेनुंविनाकक्षावृत्तेस्फुटचंद्रदर्शनंकथंस्यात्।।स्फुटचंद्रस्यकारणंउच्चनीचस्थ
त्व।।उक्तंचसूर्यसिद्धांते।।अदृश्यरूपाःकालस्यक्रूरयोभगणाःस्मृताः।।शीघ्रमंदोच्चपातास्या
ग्रहाणांगतिहेतवःसादि।।अतोमुच्चग्रहेनुमितियदुक्तंतन्नचकुरंस्त्रमितिप्रतिभाति।।अतए
वकुरंतरंवक्ष्यति।।अर्कमर्कजेत्यादि।।अथयदुक्तंगतिनरोननतदृश्यंनन्यग्रहाणांफलदातृत्वं
संज्ञंप्रतिपादयन्चंद्रस्यफलंगौरवंदर्शयति।।अत्रयेनविकलादृक्कार्धमध्यक्रियांतिफलमस्तु
किंनतः।।तावद्येनफलेगौरवंगतिनर्योवनीसाधिफलैःकृत्वानिधिरिति।।अत्रयेषांमादीनांपा
तःविकलादृक्कैविकलाथादृक्कैर्यदिमपिअहर्दिवसेनयांतिनगच्छंतितेभ्यःफलंकिमस्तु।
अपिनुनास्तु।।नहिनवर्षेहाननोपिकल्पांतमत्रंचलंति।।अतोयावतीगतिस्तावदेवफलगौरवं।।य
थथागतिरधिकातथातथाफलगौरवं।।अल्पकालेनेवफलंवेचित्र्यात्।।इतिहेतोःकृत्वानिधि

अत्रदृमाःसर्वग्रहेभ्योऽधिकफलः।।अधिअत्रपिंकफलंमस्यासावधिकफलः।।अन्यग्रहणांगतियोगोपिचं
द्रगतिसमानस्यानयतोसावधिकफलइतिभावः।।तथाचोक्तं।।एकतस्तुग्रहाःसर्वेएकतःशी
घ्रालांछनः।।ततोऽधिकतरश्चंद्रस्तस्माच्चंद्रंपरिक्षयेदिति।।अत्रयःसंपूर्णतःसएवराहुरित्यर्थ
इमंपाठांतरमाह।।किंचगोलगणितेकुजिस्कुजःसोमसौम्यमंदयादयोपिच।।पर्ययेणननुराहुपान
योनामानीविद्धुरेनांत्रिकाइति।।२।।किंचप्रमाणांतरमप्यस्ति।।जिष्णुजोब्रह्मगुप्तःप्रसिद्धः
रोमकोमुनिः।।मयोमयासुरः।।आदिशब्देनपितामहवसिष्ठादीनांग्रहणं।।ननुएतेनात्रिकाः
रागस्त्रग्णेतारःराहुपातनयोनामानीपर्ययेणोवविद्धुः।।पातपर्ययेराहुरित्यंप्रयुंजते।।घट
कर्पोलेवत्।।तथाचोक्तं।।कुजदिनीपतिपातेराहुमाहुरिहकेपिनमंयेति।।अतोयःपातःस
एवराहुरितिसोमरोमकादीनामुक्तेर्दृनसंपातएवराहुरित्यर्थः।।ननुपातएवराहुर्नवकु
ज्वस्यफलदातृत्वाभावेकिंमायातं।।नत्वाप्युच्चग्रहेनुमितिकारणमुपन्यस्तं।।नदृष्टेसूक्ष्मदृ
ष्टिर्विचार्यमाणेसंदिग्धमितिसांकामनसिधृतानेत्रिरासेयुक्तंभास्करमाह।।अर्कमर्कजकुजो
र्यतुंगनांकिंनयंतियदिनस्पष्टगफलेन।।कल्पनायदियमुच्चमुच्चरन्कोपिशोधितफलंनचकु
र्यात्।।१२।।नदुच्चंयदिदृष्टंफलदातृत्वेसत्तंत्रंनचेन्नहिसोमरोमकमयारयः अर्कजं

DR. BHAU DAJI MEMORIAL

अर्क-

कुजार्थनुंगतांकिंनयंति॥आर्यभुरुः॥अर्कजकुजार्थापिणंनुंगंतस्यभावस्तथाग्रानिभौम
बृहस्पतीनांत्रीघ्रेसूर्यएवेतिकथंवदंतीति॥यद्येषांसूर्यएववृत्रीघ्रेनहातस्यफलदातृ
नेवृथाकृतस्यात्॥तन्नस्माकारणाद्दियंकल्पना॥उच्चंहिकल्पनामात्रंमंदफलादिसाधना
यैति॥उक्तंचगोलाध्याये॥यःस्यान्नग्रहेभ्यःप्रतिमंडलस्यदूरंभुवस्तस्यकृताच्चसंज्ञा॥सोपि
दृग्ग्रहतुल्यतीतिनस्मात्प्रकल्पितानुंगगतिर्गतिज्ञैरिति॥अतउच्चस्यकल्पनामात्रत्वान्ना
फलदातृत्वं॥तर्हिपातोऽपिरारसाधनायकल्पनामात्रंगृह्यतेतस्यापिफलदातृत्वंभवद्दि
त्यं काय्यामाह॥उच्चमुच्चैर्न पीति॥उच्चंरोपितफलंउच्चैरनुक्थयन्नृषोऽपिनश्रुतः॥रोपि
तंफलंयस्मिन्नृतमथा॥उच्चस्यफलंकुत्रापिनश्रुतमिति॥अतस्तस्यफलश्रवणाभावात्ते
कल्पनामात्रमितिभावः॥अतःपातस्यग्रहत्वंयुक्तं॥उच्चस्यफलदातृत्वाभावेग्रंथकृताकिम
र्थमेतान्नप्रपंचितं॥पर्वतस्यानंतुआगमरूपं॥अतःग्रथमतएवतत्रोपागमाभावःकारणं
कथंनुवक्तव्यमिति॥नुदिनाद्यधिपस्यंतस्यपातस्यकथंनास्तीतिनचाह॥राहोर्नीहोरात्र
वर्षाद्यधिपस्यंमत्स्यंसर्वेषामुगानांमधीशौ॥यस्यछायापुष्पवंतौविनष्टौक्रांतस्यस्वामिता
यावनष्टिः॥१४॥मालिनीवृत्तं॥अहोरात्रहोरात्रहोरात्रवर्षाधिपत्यंनास्ति॥अहोरात्रंवारः॥वर्ष
वत्सरः॥तौमासहोरादिनामुपलक्षणं॥तेषांस्वामित्वंराहोर्नास्तीतिसत्यंसत्यमेवेतिव्यंगोक्तिः॥
तथापिसर्वेषांमुगानामधीशौपुष्पवंतौचंद्रार्कौयस्यराहोश्छायापिनष्टिंनूर्णयंति॥पिष्टपे
षणे॥तस्यराहोःस्वामितायाविनष्टिः॥विनाशः॥क्रांतस्ते॥नकुत्रापीति॥एकयोक्त्यापुष्पवंतौद्वि
वाकरनिशाकरावित्यमरः॥ग्रहाधीशौचंद्रार्कौयस्यछायामित्रंविकत्थयंतिनस्यस्वा
मित्वंनास्तीतिनकुत्रनूच्यते॥अतःपारंपर्येणादिनरात्रिवर्षादीनामप्यधिपत्यंतस्यास्त्येवेति
भावः॥अथगतिवशात्फलमितिप्रतिपादयन्नराहोर्गतिंसद्भावप्रमाणमाह॥प्रतिदि
नंखचरःग्रचरन्नफलंकिमप्यश्नुतेचारफलाहिसः॥ग्रहणात्रक्षगएवसचेन्नकिंच
लतिकिंचिदुपलब्धएव नहिमि॥१५॥कुतविलंबितं॥खचरःप्रतिदिनंग्रचरन्सन्किम
पिफलंयच्छतीति॥हियस्माकारणात्सखचरःचारफलःचारेणगत्याफलंयस्यासोतथा॥य
स्मात्खचरःचारफलइत्युच्यतेतस्माद्यथायथायोग्रहःकिंचलतिनथाफलंयच्छतीत्यर्थः॥
सराहुर्ग्रहणात्रक्षगएवास्ति॥ग्रहणनक्षत्रेस्थितएवास्ति॥ऋत्यकइतिप्रकृतिकत्वं॥
विपक्षेप्रत्यक्षबाधमाह॥सचेदिति॥सराहुश्चेद्ग्रहणात्रक्षगोनास्तिनहिउपलब्धःकिंचित्किंचल
तिउपलभ्योग्रहणं॥एतदुक्तंभवति॥ग्रहणेराहुसांनिध्यमस्तीतिग्राकृतप्रतिपादनं॥ग्र

हणांकिंचित्त्रिमासंसार्द्धैकभागभ्रमणेनैतिषण्मासेनचभागैःपृष्ठनक्षत्रसेवते॥ततःएकग्रहण
यस्मिन्नक्षत्रेपृष्ठंतत्सप्तंतत्पृष्ठनक्षत्रेनसप्तमंपितत्पृष्ठनक्षत्रइतिग्रस्तंदृश्यते॥अतोग्रहणान्च
लनंसैवराहुगतिःग्रहणेऽवश्यंतत्सान्निध्यात्॥अतश्चराहोर्गतिसद्भावाद्ध्रुवफळदातत्वंचास्ति
इतिसिद्धं॥एवंराहोर्ग्रहत्वादिकंसंस्थाप्यानेनैवयुक्त्याकेतोरपिग्रहत्वंसंस्थापयंति॥उदय
मेतियदादिवितत्सरंचलतिकेतुरपिप्रतिवासरं॥भवंतिनग्रहणवर्गतिंविनाजगतिकर्मविपा
कवदावदः॥१६॥इतिनिलंबितं॥यदादिवित्रांकारोतत्सरंनेस्याराहोःपरंपश्चिमंकायःउद्
यमेतिनदाकेतुरपिप्रतिवासरंचलतीतिस्यात्॥एतदुक्तंभवति॥वृत्तेपातमिसादिनाराहोः
षड्भांतरेद्वितीयःसंपातस्तस्यधृतंसकेतुरितिप्रतिपादितं॥तत्संनिधानेपियद्ग्रहणंतदपित्र
वक्रगतिः॥अतःकेतोरपिगतिःसिद्धा॥गतिसिद्धौसत्यांग्रहत्वंफळदातृत्वंचसाधयति॥ध्रु
तीति॥गतिंविनाग्रहएवनभवतीति॥कथंभूतः॥ जगतीहजनकर्मविपाकवदावदः॥कर्मणो
विपाकस्तंवदतीतिकर्मविपाकवदावदः॥पचादित्वात्॥वरिचलितंतद्वांवादितम
ध्यक्षाभ्यामस्येतिद्वितमथासस्यांतच॥यस्यहिगतिरस्तिसएवग्रहोभवति॥अतोसौपूर्व
कर्मविपाकजनितस्यशुभाशुभस्यसूचकोभवेत्॥तस्माद्केतोरपिग्रहत्वंफळदातृत्वंसिद्धं॥

श्री
॥५१॥

ननुग्रहणेतमएवग्रसक्षंदृश्यतेसकथंग्रहोभवतीतिपरमतांराकांभोजराजेनदूषितेसाह॥परि
हरंस्वपरागपरागतंतमउपस्कृएवसकिंग्रहः॥इतिमणिश्रवांसिवृएवतामतमतेक्ष्यतभो
जमहीभुजेति॥७७॥दृतविलंबितं॥उपरागेग्रहणेपरागतंप्राप्ततमउपप्लवोरिष्टमेवंतपरि
हरंतिस्वजंति॥सकिंग्रहः॥सग्रहएवनभवतीति॥ तथाहि॥चंद्रार्कयोर्ग्रहणेस्वाभाविक
दृष्टेरनरोधकंग्रसक्षंयत्तमोदृश्यतेनदुसातएवग्रहकृतःस्यात्तमुसातस्यकृतोनु॥परिवेष
दृष्टवत्॥अतस्तत्तमउसातएवेतिपरिहरंतिआचार्याः॥इतियत्मतंतन्मणिश्रवांसिवृ
एवतामणिश्रवाक्यानांविवरणंकुर्वतांभोजमहीभुजाभोजराजेनन्यक्षतंक्षयंतं॥अक्षिघ्नत॥
तक्षरननूकरणे॥कर्मणिक्तः॥एतन्मतंमणिश्रवाक्यविवरणेभोजराजेननिराकृतमित्यर्थः॥
नद्यथा॥उसातोहिगणितागतोनोपलभ्यते॥ग्रहणंहिसम्यगुपलभ्यते॥अतोनोसातः॥किंच उ
सातोहिदृश्यविशेषणंयत्रक्वचनदृश्यते॥चंद्रग्रहणंतुसर्वदृष्टंतत्रनासातइतिगणितागतग्रस
क्षं॥आगमश्च॥आगमश्चब्रह्मणावरप्रदानादेः॥ग्रहचारेनरुक्तकथनेच॥लोकप्रसिद्धिश्च॥
राहुकृतंग्रहणंस्यादा गोपाद्योगनादिसिद्धमिदमितिं ब्रह्मगुप्तः॥अन्याअपिपुरस्ताद्युक्ता
युक्तयश्चेत्यादिश्रमणेनस्वमतंभोजराजेननिराकृतइतिभावः॥नचागमश्रमणेनराहोःसि

द्धिरस्मिपरंतुदृग्दृश्यकालावरणादिभेदै गोलिवासनाभ्यांसिद्धिर्नास्तीतित्राह॥अथा
व्यसोकेवलवासनाभ्यांनायातिसिद्धिंनदृष्टिप्रियंनः॥अवासनंकिंनसुरद्युरात्रमकर्यिनाभ्यांप
वतेवभजे॥८॥उपजातिका॥अथापियद्यपिअसोराहुःकेवलाभ्यांएकस्यामनगोलवासना
भ्यांसिद्धिंनायातिनदृष्टिनोऽस्माकंप्रियंमासुवासनयासिद्धिः॥तत्कथं॥अर्कयिनाभ्यांसूर्यस्यो
त्तरदक्षिणयनाभ्यांसुराणांदेवानांद्युरात्रमहोरात्रंअवासनंवासनाबाह्यंभवतात्ययेनकिंन
भेजेकिंनस्वीकृतं॥अपिनुस्वीकृतमेव॥द्युरस्यमयंदिनवाचकमितिक्षीरस्वाम्याद्यः॥एतदुक्तं
भवति॥मेरुगतानांदेवानांसाडेकामंडलक्षितिर्जेया॥तस्मादुपरिस्थिताःक्रांतिवृत्तेमेषादयः
षडुत्तरायणाभूताः॥तुलादयःषडधःस्थिताःअहूतयाः॥अतोमेषादिषडुत्रिंशस्थितेऽर्केदेवानां
दिनंतुलादिस्थितेरात्रिरितिद्युरात्रंगोलवासनासिद्धं॥यद्वारूपूर्वमनुत्रेयमुनरंघयनमाहुर
हश्चनहामरामि त्यादिभूतशयनांदिनंदक्षिणायनंरात्रिरित्यागमस्यविरोधभयादृदृगा
सनाबाह्यमपिद्युरात्रंत्वयाऽपिस्वीकृतमतोऽस्माभ्यंकमिदंवासनमागमभयात्स्वीकृतमि
तिभावः॥अथानयाविरोधंपरिहरति॥सिद्धांतपक्षस्तुपरंदिनार्द्धंत्रिंशन्निशार्द्धंसरनोदि
नश्रीः॥एवंपुराणोगणितंचसाम्यमर्कयिनाभ्यासदृसत्फलेष्वस्ति॥१२॥उपजातिका॥सिद्धांत

श्री
॥५२॥

सिद्धांतस्थायमाशयइति॥दिनार्द्धसरंत्रिंशन्निशार्द्धंसरनोदिनश्रीः॥दिनलक्ष्मीः॥दिनमेवेतिया
वत्॥एवंसत्सकार्यिनाभ्यांसकाशात्सदृसत्फलेषुविषयेपुराणेगणितंचसाम्यंस्यात्॥एतदुक्तं
भवति॥गणितेकिलकर्कसंक्रमेदिनार्द्धंतत्सरंरात्रिमुखत्वाद्रात्रिरिष्यते॥एवंमकरसंक्रमे
निशार्द्धंतत्सरंदिनोमुखत्वाद्दिनमेवेति॥तथाचसिद्धांतेविरोधपरिहारः॥दिनंसुराणामयनं
यदुत्तरंनिशेतरात्रीणांहितमेषुकीर्तितं॥दिनोमुखेऽर्कदिनमेवतन्मतंनिशातथातत्फलकी
र्त्तनायतद्दिति॥अथैतदेवस्पष्टयति॥कर्कंगतेऽर्केहिसुरापराह्णःफल्गुनारात्रिरहाहुरस्य
॥नक्रंगतेचापररात्रमेषामेतत्सुरंवासरवत्स्मरंति॥२०॥उपजातिका॥व्याख्यातपूर्वमि
तत्॥हियस्माकारणात्कर्केगतेऽर्केसतिसुरापांदेवानामपराह्णःस्यात्॥अह्नःअपरंअपरा
ह्णः॥तदिनोत्तरार्द्धेअस्यकर्मणःफल्गुनरात्रिरहाहुः॥नक्रंमकरंगतेऽर्केसतिएषांदेवानांअप
रंरात्रंस्मरंति॥रात्रेरपरंअपराह्णरात्रेः॥अहःसर्वेकदेशेसर्व॥रात्राक्षाहाःपुंसीतिपुंस्त्वं॥
एतत्सरंएतस्मात्सरंवासरवत्स्मरंति॥संहिताकारादयः॥अत्रयदृष्टीकरणार्थंएतेदृष्टांत
मंत्रमाहुः॥अनश्वकेऽश्विदृग्रामी यपित्राङ्कःपिलिकोवधविधिःकिलाकः॥मासोत्य
एवंनियमत्रयादोषित्रेनिशार्धेसतिपूर्णिमास्यामिति॥२१॥उपजातिका॥किलसहितकें

अतश्चहेत्तोः दर्शमीघपित्राकूपूर्वकापालिकोवेधविधिरुक्तः॥ निशार्धादिनार्धपर्यंतंप्राक्कपालं दिनार्धान्निशार्धपर्यंतंपश्चिमकपालं॥ ग्रहगणितेत्रविद्वद्भिः॥ तयोःकपालयोर्सवःकापालिकः॥ अयंभावः॥ दर्शमीद्वेषसंयुक्तोयदिस्याद्देवणोदयः॥ वेलवेसुनकर्तव्यंतद्दिनेकादशीव्रतमित्यादिवाक्यैरुणोदयद्वयाभ्यांविद्धैकादशीयथावेलवेस्यात्तत्तुल्यैश्चिन्नंवादिसंप्रदायिभिरर्द्धरात्रेद्वयाभ्यांविद्धैकादशीग्राह्यते॥ अर्द्धरात्रादुपरिउत्तरदिनप्राप्तेः॥ तद्वाक्यंच॥ अर्द्धरात्रेऽपिकेषांचिद्दर्शमीवेधइष्यते॥ अतश्चधर्मशास्त्रेपित्रूक्तोचार्नवादिषुकेचिद्दूरीत्रा दुपरिउत्तरदिनमिच्छंति॥ अतश्च॥ विष्टिरंगारकश्चैव व्यतीपातश्चवैधृतः॥ अस्मरंज अनक्षत्रंमध्यास्तासरतःभूमिसुतादिवाक्यानामवकाशः॥ अपिच॥ मासोऽयइति॥ एवम नेनैवहेतुनापौर्णिमास्यांपित्र्यंनिशार्धसंतिनियमत्रतादावयोमासःस्यात्॥ पितॄणामिदंपित्र्यंपितृयत्॥ नियमाचातुर्मास्यशाकदधिसाद्याः॥ अतानेकार्त्तिकव्रतादीनि॥ तेषामारंभःपूर्वमासस्यपूर्णिमासिमारभ्यैव॥ यतस्तास्यपितॄणांनिशार्धे॥ तथाहि॥ चंद्रस्योर्ध्वभागेव संतःपितरःस्वमस्तकोपरिदर्शेसूर्यंपश्यंतिअतस्तत्रदिनार्धे॥ एवंपूर्णिमास्यांसूर्यस्यअधः स्थितत्वादर्धरात्रः॥ कृष्णपक्षार्धेसूर्योदयः॥ शुक्लपक्षार्धेस्तमयइतिपित्र्यमानस्यवासनयासि

ध्यंतप्रसिद्धं॥ अथराहुसद्भावप्रमाणंनरमाह॥ तदितिविद्यतएवसकिंपरेरुधिरबिंदुनपुर्बिलसंतिये॥ तदृहनामसकीळकेतवःस्युपितृराहुसमर्थनहेतवः॥ २॥ दृनबिलबिलं॥ तन्नसादितिहेतोःसराहुर्विद्यते॥ परैरन्यैर्हेतुभिःकिं॥ अन्यश्चहेतवस्तिष्ठंतु॥ तमेवहेतुमाह॥ रुधिरइति॥ रुधिरबिंदुवपुर्यथातथायेनामसकीलकेतवोबिलसंतितेषु पितृराहुसमर्थनहेतवःस्युः॥ रुधिरस्यबिंदवोयस्मिन्दुधिरबिंदुनच्चतद्दुश्चनतथा॥ वपुःशरीरं॥ नामसकीलकाश्चतेकेतवश्चतेतथास्वश्रासोपिनाचस्वपितातस्यसमर्थनंसंस्थापनंतत्रहेतवस्तेतथा॥ नामसकीलकारमाथेकेतवस्तेराहुसुताइसुतत्वात्॥ तेषांकेतूनांपितारा हुरसीत्यर्थः॥ यथोक्तंवराहसंहितायां॥ क्षतजानलरूपाः त्रिशूलनाशाःकुजात्मजाःषष्टिः॥ नाम्नाचकोंकुमास्तेसोमाशासंस्थिताःपापाः॥ त्रिंशत्यधिकाराहोस्तनामसकीलकाइतिस्मृताः॥ रविसंक्रांतिगदृश्यंतेतेषांफलमर्कनक्षोक्तमिति॥ राहोर्ग्रहत्वप्रकृतेऽप्रमाणेनमंग्यंतरेणदृश्यति॥ यःपर्वगस्तस्यगतिर्नदृष्टासेवग्रहत्वेऽपिमहत्प्रमाणं॥ विलोमगामीविधुपातएवेनाद्रुहोराहुरितिप्रतीतेः॥ उपजातिकौ॥ यःपर्वगोग्रहणेराहुस्तस्यगतिःसाक्षान्नदृष्टाकिंतुअनुमानेनग्रहणऋक्षगतएवसादिना॥ अतोगतिरस्तीत्यनुमानासिद्धं॥ सेवगतिर्ग्रहत्वमहत्प्रमाणं॥

हियस्मात्कारणादेषवि धुपातोराहुर्विलोमगामीसदावक्रचारीअस्तियथाबंद्राकोंसदानुलाम
गामिनोतथैवायंसदाविलोमगामीति॥तथाचभट्टपाळः॥राहुकेतूसदावक्रौवुद्यगौद्यानिभा
स्करावितिं॥तस्माद्राहोशुद्धिरितिप्रतीतःप्रत्यक्षंप्राप्तः॥एतद्वाक्यंयथैवकृतोनपतीतिप्रतिभाग
तिर्हिनंरवचरइत्यादिनापौनरुक्त्यापत्तेः॥तर्हितिरूसनेनाध्यायसमाप्तिप्रतीतेश्च॥॥
इतिश्रीमत्सकलागमाचार्यश्रीकेशवसोमसुतजगन्नाथविरचितायांविवाहवृंदावन
टीकायांविवाहदीपिकायांराहुसत्ताध्यायः॥॥छ॥॥छ॥॥छ॥॥छ॥॥छ॥॥
अथग्रहयुतीदिफळानिविवक्षुस्तानन्नादिभावानयनंजातकेप्रागुक्तंयत्रसोक्तंयोग
माह॥॥कृतालग्नादर्कवद्वात्रिखंडंभयोयस्तेस्तहृद्दीभिर्विलिप्तं॥चक्राधोनिक्षिपेत्तत्काळए
वंजायेयातामस्तमध्यान्तलग्नेति॥९॥अस्मान्नवग्रालिनीवृत्तानि॥लग्नादर्कवद्वात्रिखंडं
कृत्वातस्यघटीर्निधायःपुनर्वक्षैर्लंकोदयैर्लग्नंकार्यं॥नद्यथा॥लग्नमेवसूर्यंकृत्वाऽयनां
शान्दत्वातस्माच्चरंकृत्वारात्रिदळंकार्यं॥तमिष्टकाळंभक्त्वनस्माल्लायनांशलग्नालंको
दयेभोग्यादिकंकृत्वालग्नंकार्यमिति॥अर्थाच्चतुर्थलग्नंस्यात्॥तेदृलग्नंचक्राधोनिक्षिपेत्सू
र्यंकार्यं॥एवंतेतत्काळंअस्तमध्यान्तलग्नंक्रमेणजायेयातां॥उत्तन्नमनेना॥लग्नंतुर्यंचु

र्यमस्ताद्विलोमध्यमध्यात्तंमध्यमेंद्वीविलग्नात्॥दोषत्र्यंशान्द्विर्द्विराद्येषुद्व्याद्यंभावाःसंधि
रेतद्दळैक्यमिति॥२॥लग्नंतुर्यंचतुर्थलग्नाद्धोध्यंतूर्यमस्तात्सप्तमलग्नाद्धोध्यं॥अस्तंमध्याद्द
शमलग्नाच्छोध्यं॥मध्यमेंद्वीविलग्नाच्छोध्यं॥इंद्वस्ययमेंद्वीपूर्वाद्दिनूनतत्तद्विलग्नंतद्दलग्ने
मिसुचते॥तस्मान्मध्येशोध्यं॥दोषाणांचतुर्णामपिपृथक्पृथक्त्र्यंशान्आद्येषुलग्ना
द्दिष्वेवंद्वादशद्वादशान्॥एवममुनाक्रमेणभावाःस्युः॥नद्यथा॥लग्नंचतुर्थाद्दिशोध्यंतस्मात्त्रं
शोलग्नंदत्त्वाद्वितीयभावोभवेत्॥पुनरपितमेवत्र्यंशांद्वितीयभावंदत्त्वातृतीयभावोभवेत्॥
एवंतुर्यमस्ताद्दिशोध्यत्र्यंशान्तूर्यंदत्त्वापंचमषष्ठौभावौस्तः॥एवमष्टमनवमादयः॥एत
द्दृळैक्यंसंधिःस्यात्॥तद्यथा॥द्वादशभावलग्नयोरेकंदळंतन्मध्यवर्त्तीसंधिःस्यात्॥
एवंलग्नद्वितीययोर्द्वितीयतृतीययोरित्यादिभअथग्रहफळानांभावकल्पनयाग्रहानारभ्य
माह॥संधौरवेर्निःफळोभावभागेस्तुल्यःसम्यग्भावपंक्तिंभनक्ति॥संधेरूनाधिक्यमा
लोगतेष्यभानाधीनंसंदधातिस्वपाकमिति॥२॥संधौस्थितोग्रहोनिःफळःशुभफळोऽत्य
शुभफळोपि॥भावभागेस्तुल्यःरवेःसम्यग्भरिपूर्णंभावपंक्तिंभावफळंयनक्तिप्रकट
यतिदर्शयतीतियावत्॥संधेःसकाशाद्रूनाधिक्यमाप्तःप्राप्तःरवेःगतेष्यभानाधीनंस्वपार्क

संदधाति ॥ संधेरूनोग्रहो गतभावजंफलं ॥ अधिकस्तेष्यभावजंफलं दृष्टातीत्यर्थः ॥ तत्फलं
षष्टार्धेनैत्रैराशिकेनकल्प्यं ॥ एवमनेनविधिनायत्रभावस्थितोग्रहस्तत्फलंभावजं ॥ लग्न
राशेः सकाशाद्यावतिराश्योस्थितोग्रहस्तत्फलंस्वाभाविकं ॥ अनयोर्विभेदंसनिर्णयमाह ॥
नोगीकारोभावजानांगुणानांतद्दोषाणांतत्वतस्त्यागएव ॥ भावअकोनष्टमतंगतोपिस्याओ
लग्नात्सप्तमःसप्तमस्थितिति ॥ ४ ॥ भावेनभावकल्पनयायेजातागुणास्तेषांगुणानांनांगीका
रःनस्वीकारः ॥ तस्माद्भावकल्पनवशाद्दोषास्तेषांदोषाणांतत्वतःसाकल्येनत्यागएव ॥
अत्रप्रथमस्योदाहरणं ॥ भावेतिस्वाभाविकेलग्नात्सप्तमःसप्तसप्तिः सूर्यःभावअकोसप्त
भावकल्पनयाऽष्टमतंगतोपिस्याओएव ॥ सप्तसप्तयोर्ध्वायस्यासौतथा ॥ एतदुक्तंभवति ॥
सूर्यःकिलसप्तमोदुष्टः ॥ अष्टमःशुभः ॥ स्वाभाविकेनसप्तमःसूर्यः यदिभावबलाद्दृष्टमोभवे
न्नदासौशुभोपिस्याओएव ॥ अथयुक्तिकंद्वितीयोदाहरणमाह ॥ प्रत्याख्येयःपाक्षिकोऽपी
हदोषःसम्यग्मापीयोगुणः सोऽनुगम्यः ॥ यस्माद्रोगेहभावाधिकःसन्नस्याद्वक्रभाग
वःपंचमोऽपि ॥ ५ ॥ यस्मात्कारणाद्दोषः पाक्षिकोपिप्रत्याख्येयस्याओः ॥ गुणस्तुयःसंम्य
ग्मापीसोनुगम्यः अनुसरणीयः ॥ सम्यग्मानातीतिसंम्यग्मापीसर्वसंमतः ॥ पक्षांतरगतो

पिदोषस्याओगुणस्तुसर्वसंमतएवयाद्य इत्यर्थः ॥ तस्मात्कारणात्पंचमोपिभार्गवः अंगारो
गेहभावात्गृहभावभागभः अधिकः सन्नरसेशुभायनस्यात् ॥ अयंभावः ॥ पंच
मःशुक्रः किलशुभः षष्ठोऽशुभः ॥ भावाद्यदुभयतासंधिस्तदनर्हिनोंऽशास्तद्भावस्याअ
तःपूर्वसंधेःसकाशाद्द्वारधिकोग्रहउच्चस्थाग्रहिनोभवेत् ॥ अतःस्वाभाविकेनपंचमः
शुक्रोभावबलेनषष्ठोभवेत्तथापिस्याओएवेति ॥ अथलग्नाद्दृष्टिकाज्ञानंविवक्षुस्तद्
र्थंतावत्संक्रांतिज्ञानमाचष्टेण सूर्यइतिलग्नांशाज्ञानंचाह ॥ संक्रांयंतर्वासरेयद्युदृष्टा
लब्धंभानुभादिभषष्टिभिश्चं ॥ भक्तांशमेलग्नभुक्तानवांशादिघ्निर्घाश्चिंशदंशा
भवेयुः ॥ ६ ॥ अंतर्मध्येनसशः संक्रांसोरंतरंसरास्तेनथा ॥ तेद्युर्दृष्टादिनगणाद्वादि
गाद्यादिलब्धंतन्मेषादिराशिभिर्मिश्रंयुक्तंभानुः स्यात् ॥ तद्यथा ॥ संक्रांतिमारभ्यद
र्शादिनपर्यंतंयोगतोदिनगणः सपूर्वसंक्रांतिमारभ्योत्तरसंक्रांतिपर्यंतंयेमध्यन
र्तिनोदिवसास्तेषंक्तः ॥ तस्माद्वाद्यादियल्लब्धंतत्संक्रांतिरग्रेनगनराशिर्भुक्तंरा
श्यादिकोभानुःस्यात् ॥ अथांशाज्ञानं ॥ भक्ता इति ॥ लग्नस्यभुक्तायेनवांशास्तेद्विघ्निर्
घाश्चमेषंक्तास्त्रिंशदंशाभागाप्तनेयुः ॥ नद्यथा ॥ यथोक्तविधिनालग्नभुक्तैनवांश

BHANDARKAR ORIENTAL RESEARCH INSTITUTE

शुद्धिंचविचार्यअजमृगानतोऽहिइत्यादिवाक्यमाणोक्तलग्नादिमंशारभ्यइष्टन
वांशात्पूर्वंयेनवांशाभुक्तास्तेदग्धाश्चित्रभक्तास्तेलग्नराश्यधोभागाःस्युरितिराश्यादि
लग्नंस्यात्॥अथाभ्यांकालमाह॥रात्रौभानुर्भार्धयुक्तसायनांशास्त्वर्कांशाःस्वोदयघ्नाः
पृथक्कृते॥त्रिंशद्भक्तभुक्तभोग्याःफलादितादृक्कालोमध्यगःस्वोदयाढ्योइति॥७॥रा
त्रौभानुर्भार्धयुक्षडंशियुक्तःदिनानुयथास्थितएव॥सायनांशाःअयनांशसहितः
दिनरात्रौच॥अथलिप्तंचसायनांशंकार्यं॥तन्वर्कांशाःक्रमेणभुक्तभोग्याःपृथक्स्वो
दयघ्नाःत्रिंशद्भक्ताःफलादिःस्यात्॥अर्थाद्भुक्तंभोग्यंच॥तद्यथा॥तनोर्लग्नस्यभुक्तभो
गालग्नोदयेनगुणिताःत्रिंशद्भक्ताःफलादिभुक्तंस्यात्॥एवमर्कस्यभोग्यभागाअर्कोदि
येनगुणितास्त्रिंशद्भक्ताःफलादिर्भोग्यंस्यादिति॥तादृक्कालःस्वोदयाढ्योमध्यगःस्या
त्॥तद्विवृण्वतेऽसौतादृक्॥सचासौकालश्चतादृक्कालःफलादिभुक्तभोग्यकालःस्वो
दयैर्मध्यवर्त्तिभिरुदयैरुद्धृतःमध्यगःलग्नार्कयोर्मध्यवर्त्येककालःस्यात्॥अथलग्न
कालमुक्त्वालग्नाकालहोरामाह॥तत्कालार्कंन्यूनलग्नांशपिंडोभक्तःपंचक्षोणिभिर्भु
क्तेहोराः॥भास्वच्छुक्रइंदुसौरार्यभौमाःसंख्यायेरन्वारतस्तेतदीशाइति॥८॥सचासौ

DEPARTMENT OF BHANDARKAR ORIENTAL RESEARCH INSTITUTE

कालश्चतत्कालः॥तत्कालेऽर्कःनेतृनंशतल्लग्नंचतस्यांराश्यंशलेषांपिंडःसंहृतःपंचक्षोणीभिः
पंचदृग्भिर्भुक्तहोराःस्युः॥तदीशाःतासांहोराणामीशाःभास्वदादयोवारमाश्रयसंख्या
येरनुगण्येरन्॥कर्मणिलिंङ्॥भास्वान्सूर्यः॥शुक्रःप्रसिद्धःसौम्यबुधःइंदुश्चंद्रःसौरःशनिः॥
आर्यशिरूभौमःप्रसिद्धः॥अथपापहोरासंज्ञमाह॥होराःक्रूराःसौम्यवर्गाधिकेस्फुटलग्नेमोघाः
सौम्यवारेचरात्र्यांपापाऋक्षनिःफलेभाजोस्युर्मेलग्नेसतुहाणाः॥९॥सौम्यग्र
हहोराःशुभाःपापहोराश्चेतिस्पष्टमर्थसिद्धं॥वासौम्यवर्गैरधिकेसौम्यवर्गाधिकेतस्मिन्
लग्नेसतिक्रूरहोराःमोघानिःफलाःस्युः॥गृहादीन्षड्वर्गान्विक्ष्यति॥तत्रचतुरधिकाःसौम्य
वर्गाश्चेत्स्युस्तदासौम्यवर्गाधिक्यमितिस्पष्टं॥किंच॥सौम्यवारेरात्र्यांचक्रूरहोराःमोघाःस्युः॥
सौम्यवारेसद्दारात्रौक्रूरवारेसत्यपीत्यर्थः॥तथाचगर्गः॥क्रूरवारेक्रूरहोरेनशस्तादुर्मंगळे॥
नानिदृष्टाशुभेवारेरात्रौस्वल्पफलामते॥वैद्यनाथः॥तत्रलग्नंचतुर्होरंदृश्यतेकालहोरयेति॥
एतत्संगेनान्यस्यापजनितस्याशुभफलस्यभंगमाह॥पापारिष्टंपापग्रहजनितमरिष्टंअशु
भंनिःफलंस्यात्॥कस्मिन्सतिमुक्तिर्भाद्रोबलिनोसद्भिर्नाणांषड्बलेप्रगेसति॥एवंकालहोराणां
मतांतरमुक्त्वासर्वसंमतंवक्ष्यन्तदर्थंतावद्वारप्रवृत्तिमाह॥चरार्द्धदेर्यांतरयुग्विरोगोक्रमे

एताभ्यां नरगोलगेऽर्के॥ योगे पुरारमुदयाद्वियोगे पश्चात्प्रवृत्तिर्दिनवारकर्तुः॥१०॥ उपजातिका॥
चरार्धदेशांतरसंचयहृगणितेऽभिदुं॥ तत्रचरार्धमेवरमुच्यते॥ देशांतरयोजनानि स्वचतुर्थभूगो
नितानि तानितत्फलानिस्युः॥ तेषांचरार्धफलानांदेशांतरफलानांचक्रमेणयुग्वियोगोकार्यो॥ क
स्मिन्सति॥ याम्योन्नरगोलगेऽर्के सति॥ याम्यगोलेयोगः उन्नरगोलेवियोगइत्यर्थः॥ तत्रयोगेस
तितैःफलैर्दिनवारकर्तुःप्रवृत्तिःस्मुदयात्पुरस्स्यात्॥ वियोगेसतिपश्चाद्भवेत्॥ अतोदक्षिणो
गोळे सदापूर्ववारप्रवृत्तिरुत्तरगोळेपश्चादिति॥ दिनस्यादिवसस्यवारस्यकर्तृवार एवतिथा
नत्॥ इयमुक्तावारप्रवृत्तिरसंगता॥ वासनाबाध्यात्॥ तु॥ सप्तर्षिवराहादिवचनविरोधाच्च॥
लंकायांसूर्योदयात्किलसर्वदेशेवारप्रवृत्तिः॥ लंकायांयक्षितिजोनदृश्यदेशेउन्मंडलं॥ उन्नगोळे
स्वक्षितिजोर्ध्वमुन्मंडलंदक्षिणेत्वधः॥ तदंतरंचरमेव॥ अतउन्नरगोळेमध्यरेखायांस्वोदृ
याद्दुपरिचरपळैर्वारप्रवृत्तिः॥ दक्षिणेतुपूर्वे॥ मध्यरेखास्वदेशोदययोरंतरंतद्दितयदेशो
देशांतरपळानि॥ तैःपळैरेखायाःपश्चिमदेशेऽर्धमुदयः॥ पूर्वदेशेत्वधः॥ अतोऽनेनविधिना
चरदेशांतरयोःसंस्कारेणाद्यूर्ध्वमधोवारप्रवृत्तिरिति॥ अतएवोक्तंसिद्धांते॥ अर्कोदयाद्यू
र्ध्वमधश्चसप्तहृ॥ तथाचसंहितायांसप्तर्षिभिश्च॥ उन्नरदक्षिणचरदलहीनयुतानाडिका

सूर्यो

श्री॰
॥५७॥

रवेरुदयात्॥ आकूपश्चाद्देशांतरयोजनाद्रवाष्टांशकेनापीत्यादि॥ अन्यैश्च॥ सोम्येगोळेसवितुरु
दयादित्यादि॥ अतउक्तमननतद्गोळवासनाविरुद्धं॥ सप्तर्षिप्रभृतिवचनेनविरुद्धं॥ अतए
वंचक्वचिन्मस्यपाठांतरमस्तीतिचेन्नात्र॥ यतः सर्वत्राप्ययमेवपाठः॥ अथचवक्ष्यमाणस्या
र्थांतरमस्तीतिचेत्तदपिन॥ उन्नानार्थत्वेसत्यर्थांतरासंभवात्॥ अर्थांतरंसवितिचेद्विचा
रयंतुमहांतः॥ नास्त्येवार्थांतरं॥ अथवक्ष्यमाणसोमध्यरेखायाःपश्चिमदेशानिवासीभविष्य
तिअतस्तेनस्वदेशाभिप्रायेणेदमुक्तमितितदपिन॥ उन्नरगोळेदेशांतरफलेभ्योहीनेचरे
सतिमध्याभिवाराद्॥ तथाहि॥ तदंतरयोःसंस्क्रियमाणेपश्चिमदेशांतरस्यावश्यत्वान्न
नुल्यैःफलैःपूर्वमेववारप्रवृत्तिर्भवेत्॥ असौतुवृत्तिर्वियोगेपश्चिमादिति॥ अतःकुत्राप्यना
लंबेनसतीदंवक्ष्यमं॥ अनेनपश्चिमदेशानिवासिनास्वदेशाभिप्रायेणवक्तुं॥ यत्तूत्तरगो
ळेचरेसतिमध्याभिवार्यं तत्तत्कदाचित्कदाचिन्नोपेक्षितमिति॥ अथहोरानयनमाह॥ द्विघ्ने
नाडीशरलब्धपूर्वैक्यान्नाडयत्रदेशेदृष्टिकालहोराः॥ संस्थोक्तवेलास्वथयद्युभाभ्यांक्रू
राक्रुवर्गश्चतदादितोदोषः॥११॥ इंद्रवज्रा॥ नाडयत्रवेलाहोरत्रवेलाभाख्यद्विघ्नाश्चताइष्टनो
ऽभ्रनाभ्यः॥ शरैःपंचभिर्लब्धंतेनतुल्याःकालहोराःकालहोरेशाःस्मुः॥ अपिर्मतांतर

द्योतने॥ आयुक्तहोराः स्युरताऽपिभवंतीत्यर्थः॥ तासुहोरासुसंरंभागणनाऽनुक्तत्वात्नभास्व
च्छुक्रेत्यादिना॥ अनयोर्मतयोः फलितमाह॥ यदितिः॥ यद्युभाभ्यांप्रकाराभ्यांकूरहोराभवेत्कुवर्गः
पापवर्गाधिक्यंचेदितिद्योत्यंभवेत्॥ तदातल्लग्नंसर्वथात्याज्यमेवेत्यर्थः॥ अथैतत्संगेनान्याज्य
महादोषानाह॥ गंडांतेष्वपिवैधृताकुलयतः संक्रांतियामद्वयंयामार्द्धंअतिपातवैष्टिकुलिके
पर्वघ्नंविलग्नंजगुः॥ द्विद्यूनामनवाऽर्कनक्तकुलिकैर्नोअर्कामुहूर्त्तानिद्विघ्नाऽऽस्त्यथुद्वारजा
श्चनपरेदोषाः रवऋादीन्विना॥१२॥ व्याख्यादूलविक्रीडितं॥ गंडांतानित्रिविधानि॥ शूलंवैधृत
वरीयस्यमिसादिनावक्ष्यमाणानि॥ वैधृतःसप्तविंशोयोगः॥ संक्रांतेःसकाशाद्यामद्वयंउभ
यतःसंक्रांतिकाद्यास्त्राकूपञ्चासोऽऽद्यार्द्धटिकाऽर्थः॥ यामार्द्धंमध्यमः॥ स्मृत्यंतरेतु
क्तः॥ एतेगंडांतादिदोषेसतिलग्नंविलग्नंजगुर्मुनयः॥ एषांन्यूनमदोषेसतिलग्नभंगःस्यादित्यर्थः॥
अथकुलिकमाह॥ द्विद्यूनाइति॥ द्वाभ्यांद्वाभ्यामूनाद्विद्यूनाःभनवऋतुदृग्रसार्कतः सूर्यमार
भ्यकुलिकिनोमुहूर्त्ताभवंति॥ कुलिकोऽस्तियेषांतेकुलिकिनः॥ रवौचतुर्दृग्मुहूर्त्तेकुलिकश्चं
द्रेद्वादशोमेदशभइत्यादि॥ निद्विघ्नेकाः॥ रवौत्रयोदशोचंद्रेएकादशइत्यादि॥ दिनस्य
अष्टमीभागार्द्धप्रहरद्वितीयादिसादिना॥ अतीपातःसप्तदशोयोगः॥ विष्टिःसप्तमैकरणं॥ कुलिकोऽनंतरमेवोक्तः॥४५॥

रात्रेर्वापंचदशांशेसमुहूर्त्तेप्रसिद्धः॥ अथैतत्संगेनान्येषांवारादिदोषाणांविषयमाह॥
स्याऽइति॥ येमयाचउक्तादोषास्तेभ्यःपरेऽमीतिथ्युद्वारजादोषाः रवऋादिन्विनानस्था
ज्यः॥ आदित्याद्दिनहूणावंगादीनांग्रहणं॥ तिथिऋउडुऋवारऋनेभ्योजातास्तेतथा॥ तत्र
तिथिजाद्यधट्टितिथ्यादयः॥ नक्षत्रजाउपग्रहादयः॥ वारजाःकंटककालवेलादयः॥ ते
रवऋादीष्वेववर्जनीयाः॥ अतोत्रनोक्ताः॥ येत्वत्रोक्तास्तेसर्वदोषाऽआइत्यर्थः॥ उक्तंच॥
तिथ्यृक्षुद्विनपतिजातायोगाद्यास्तुहूणावंगवऋाइत्यादि॥ यथा॥ यैस्तिथिऋउडु
तिथ्युडुतिथ्युडुचवारऋतिथ्युडुवाराः तेभ्योजातास्तेतथा॥ तिथिवारजानक्षत्रवार
जाऋेसर्थः॥ उक्तंनक्षत्रपतिना॥ विरुद्धयोगास्तिथिवारजाताइत्यादि॥ तिथिवारजा
संनक्षत्रकाद्यः॥ उडुवारजामृत्युयोगकालदंडादयः॥ तत्रकेचिन्मृत्युयोगंसर्वंसजेदि
ति॥ तदुक्तंच॥ सर्वदासर्वदेदोषंमृत्युयोगंविवर्जयेदिति॥ अथलग्नषड्वर्गशुद्धिमाह॥
शस्यंशाःत्रिभगुणाएषएवहनास्तिथ्यत्रभद्रिकुभरेभंकाभाद्रिकाणनंदद्रिनक्ष
द्रागभूहंयस्यस्यतत्॥ त्रिंशांशाः सितसोम्यजीवरविजक्ष्माजन्मनांशुक्रमादोजर्क्षे

षुशरा श्च सर्पमरुतः पंचेति षड्वर्गिकाः ॥१३॥ शाद्रैलविक्रिकुतं ॥ राशेः । अंशाः । राश्यंशाः । राशि
भुक्तांशाः । राशीं संत्यज्य अंशाग्राह्या इत्यर्थः । तिथ्यृतुषड्रसनेषुक्रमेणशशि भूगुणेक्षणहताः ॥
१।१३।२। इक्षणेद्वौ ॥ शेषास्पष्टाः तिथ्यश्च भूदिक्शरैर्भक्ताः । १५।१०।१०।५। अभ्यस्तवेदांशाः शे
षाः प्रसिद्धाः ॥ लब्धानि भार्धादियोवर्गस्यः भार्धहीनाद्वर्गाणि द्वे कार्ये ॥ नंददिनद्रुकृशांनवांशाद्या
दशांशाः । एवंचत्वारोवर्गाः यस्ययस्ययूनंतत्तस्यैव । अयमेकोगृहस्यः । अथत्रिंशांशाः । समरा
शौसितादीनां पंचादयस्त्रिंशांशाः त्रिंशतः एरणास्त्रिंशाः तदन्नविंशतेश्चेति उभयत्रयथः त्रिंशांशा
श्च तज्जातयश्चत्रिंशांशाः तद्यथा ॥ समराशावा याः पंचभागाः शुक्रस्यतनतः सप्तबुधस्यतनौ शो
भनाः ततः पंचशनेः ततः पंचभौमस्यति । अजर्षेषुविषमराशिस्थितेषुव्यत्क्रमात् । भागानाम
धिपतिनांच । तद्यथा । आद्याः पंचभौमस्यतनतः पंचशनेः ततोष्टौगुरोः । ततः सप्तबुधस्यततः
पंचशुक्रस्यति । अत्रसितादिनामेवोक्तमरतिनव्याख्ययागणादिक्वनविरोधो । इतीयंष
ड्वर्गिकास्यात् । षष्ठवर्गाणांसमाहारः षड्वर्गिका ॥ अथसोम्यपापवर्गेशानांयराश्याधिपा
नाह । कुजज्ञकवींद्रजचंद्रवींद्वजाः सितकुजेज्ययमार्कजसूरयः ॥ भवनपालवपाश्चतदाद्य
स्त्रजेमृगाननतौलिकुलीरकाइति ॥१४॥ द्युनखिलंविनं ॥ कुजादयोभवनपाराश्याधिपास्युः ॥

मेषादीनांकुजस्यैद्वादशाक्रैराद्यानांकुजादयोद्वादशक्रमेणाधिपाः स्युः ॥ नवांशराशेरप्यधि
पाः स्युरित्यर्थः ॥ तमेवनवांशराशिमाह ॥ तदादयइति ॥ नस्यनवांशास्यादयः प्रथमाअजमृगा
ननतौलिकुलीरकाः स्युः ॥ मेषराशेःप्रथमनवांशोमेषः ॥ एवंवृषभकरः ॥ मिथुनतौलिः क
र्कटएव ॥ एवंपुनः सिंहमेषः कन्यायांमकरइत्यादि ॥ एवंप्रथमनवांशात्तानमारभ्यजा
तानीतशुक्तनवांशेगणनीयाधिपावर्तमानोनवांशराशिः स्यात् ॥ तदधिपोनवांशाधिपति
रिति ॥ अथहोरादीनाह ॥ होरेसमेकुरवगपोविधमेरवींद्वोर्द्रेष्काणकाःप्रथमपंचनवेश्वराणां ॥
स्युर्द्रुद्रांशपतयः स्वगृहाच्छुभानिभानिग्रहाश्चनिजमित्रशुभांशभाजइति ॥१५॥ वसं
ततित्वका ॥ समेसमराशौ अजकुरवगयोर्होरेस्तः ॥ प्रागानीतलब्धनवांशसमराशौप्रथमा
होराचंद्रस्यद्वितीयासूर्यस्य ॥ विषमेप्रथमासूर्यस्यद्वितीयेंदोरित्यर्थः ॥ अथद्रेष्काणाधीशः
आह ॥ द्रेष्काणकाइति ॥ स्वगृहात्प्रथमपंचनवेश्वराणांद्रेष्काणाः स्युः ॥ तद्यथा ॥ यदाशून्य
लब्धंतदाप्रथमोनवमानः ॥ यदाएकंतदाद्वितीयइत्यादि ॥ अनेनविधिनाप्रथमोद्रेष्काणरा
श्यधिपस्यैवद्वितीयस्तस्माद्राशेः पंचमाधिपस्य ॥ तृतीयोनवमराशेराश्यधिपस्यात् ॥ अ
थवाद्रेशांशाः ॥ स्वगृहाद्द्वादशपतयः स्युः ॥ स्वीयलब्धवर्गद्रेष्काणवत् ॥ त्रिंशांशानांस्वा

श्री
॥५६॥

भिन एवोक्ताः ॥ एवं षड्वर्गाधीशउक्ताः ॥ अथैषांशुभत्वमाह ॥ शुभानीति ॥ शुभानांसौम्यग्रहाणां भानिराशयः शुभानिस्युः ॥ यद्वर्गस्यराशेरधिपः शुभसंवर्गःशुभःस्यादित्यर्थः ॥ नकेवलंराशेः ॥ यद्वाअनिजमित्रशुभांशाभाजः शुभाः ॥ निजश्चमित्रंचशुभश्चतेषामंशेननांशास्तांभजंतितेतथा ॥ स्वसुहृत्शुभानांनवांशस्थिताइत्यर्थः ॥ वर्गशब्देराश्यधिपःएवंविधस्तदैववर्गःशुभइतिभावः ॥ अथतिथ्यादीनांसंधिकालमाह ॥ भुक्त्यंतरभुक्तियोगेःपृथक्पृथक्षष्ठिगुणान्गुणाग्रान् ॥ तिथीशयोगांतरनाड्यइंदोःपुण्यारवेःपुण्यतमास्त्रिभाःस्युः ॥ ७ ॥ उपजातिका ॥ षष्ठिगुणान्गुणाग्रान् पृथक्पृथक्भुक्त्यंतरं भुक्तिभुक्तियोगैर्भजेत् ॥ क्रमेणातिथीशयोगांतरनाड्यःस्युः ॥ भुक्त्यंतरंचभुक्तिश्चभुक्तियोगश्चतेतथा ॥ चंद्रार्कयोर्भुक्त्यंतरंभुक्तिश्चंद्रस्यैव ॥ योगश्चंद्रार्कभुक्तियोगः ॥ तद्यथा ॥ त्रयस्त्रिंशत्तंषष्ट्यासंगुण्यत्रिधासंस्थाप्यक्रमेणचंद्रार्कभुक्त्यंतरेणाचंद्रभुक्त्याचंद्रार्कभुक्तियोगेनचविभज्यतिथिनक्षत्रयोगानांसंधिनाड्यःस्युरित्यर्थः ॥ तिथिनाडीस्त्रीलिंगोपिसत्वाकृतिकारात्पुंडीयकृतेतिथीसिद्धं ॥ उक्तंचसिद्धांते ॥ ग्राह्यातनुविकलाभ्यइति ॥ एतावन्मध्यगताआनीयवक्ष्यंति ॥ नक्षत्रयोगइत्यादिना ॥ चंद्रार्कयोःसंक्रमणकालमाह ॥ इंदोरिति ॥ इमाअनेनैवप्रकारेणासाधि

स्त्री ॥ ६० ॥

ताअंतरनाड्यःइंदोःपुण्याःरवेस्तुपुण्यतमाःस्युः ॥ एवंभुक्तंभवति ॥ रवेश्चंद्रस्यापिबिंबंत्रयस्त्रिंशद्भागाः ॥ अतोऽनयैवरीत्यात्रयस्त्रिंशतंषष्ट्यासंगुण्यस्वस्वगत्याविभज्यांतरकालःस्यात् ॥ सचंद्रस्यपुण्यः ॥ रवेस्तुतिग्मांशोःपुण्यतमः ॥ अयंकालोनक्षत्रराश्योर्वास्त्रेनराळेभवेत् ॥ संक्रमणकालइत्यर्थः ॥ अथभौमादीनामपिसंक्रमणकालमाह ॥ कुजादिकानामपिबिंबलिप्ताःस्वषड्गुणाःस्वस्वजवेनभाड्याः ॥ नाड्यादिकःसंक्रमणेनराळकालःस्फुटस्तत्स्फुटभुक्तिबिंबैरिति ॥ १८ ॥ उपजातिका ॥ कुजादिकानांभौमादीनामपित्रायुक्तबिंबलिप्ताःस्वषड्गुणाःस्वस्वगत्याभाड्याःसंक्रमणेनराळकालेनाड्यादिकोभवेत् ॥ अत्रबिंबानिमध्यायेवोक्तानि ॥ तेभ्यःकृतोऽयंसंक्रमणकालःसोऽपिमध्योभवेत् ॥ तत्स्फुटभुक्तिबिंबैःस्फुटःस्यात् ॥ तेषांभौमादीनांग्रहगणितोक्तभुक्त्यास्फुटभुक्तिःस्फुटाबिंबैश्चस्फुटःकालःस्यात् ॥ एषांसंधिकालादीनामधुनैतदुपयोगेसत्यर्थसिद्धं ॥ अथऋक्षादिसाधनंविवक्षुस्तत्रानयनंतावदाह ॥ रवेर्भवेदेकगृहाधिकस्ययदंशवृंदंखलुसायनस्य ॥ तदत्रराशेर्हृतयभागतल्लब्धंनसंशोधितनाभनंति ॥ १९ ॥ उपजातिका ॥ कुजादिकानांभौमादीनामपि ॥ एकगृहाधिकस्यैकराशियुक्तस्यसायनांशयुक्तेस्यारवेर्यदंशवृंद

भागसमूहोभवेत् नदांशिद्व्यभागैः षष्टिभिः स्तैर्भक्तैर्नैर्नलब्धंतेवसंतादृतवोभवंति॥ वसंत
मारभ्यऋतवः स्युः॥मृगादिराशिद्व्यभानुभोगादिषु क्रोमीनादौवसंतारंभः।अनउक्तंएकगृहा
धिकस्थेनि॥थावद्भिरंशैरयनमृतिःस्यादित्युक्तत्वात्सायनस्यैवोक्तं॥एवंकेचिदृतयनादीनि
सायनानार्कादिछंति॥तदभिप्रायेणेदमुक्तं॥केचित्तुकर्कलादेवउभयादृषिकेचित्कायनिर्णयिका
राहयः॥अथऋत्वादीनांसंधिकालमाह॥तसंधयोंगांगघटीसमाःस्युर्द्विसंगुणाश्चेद्विषुवाय
नीयाः॥ससंधिसंधिःखलुयत्रदोषःशून्यंभवेद्दोषविशेषपुण्यइति॥२७॥तेषांऋतूनांसंध
यःअंगांगघटीसमाःषट्षष्टिघटिकातुल्याःस्युः॥तदंतास्त्रयस्त्रिंशद्घटिकाःपूर्वेपश्चाच्चेस
र्थः॥चेद्विषुवायनीयास्तर्हिद्विसंगुणाःद्वाचत्वारिंशद्घटिकाइत्यर्थः॥विषुवंचअयनं
चविषुवायनेतयोरिमाविषुवायनीयाः॥विषुवंमेषतुलासंक्रमो॥अयनंकर्कमकरसंक्रमो
तसूर्यपश्चाच्चषट्षष्टिघटिकाइत्यर्थः॥यत्रकालेदोषशून्यंभवेत्॥रात्रिद्व्यभागनष्टमिति
क्रीयमाणेयदाशून्यंदोषंभवेत्॥एवमस्यांतोम्यस्यादिरित्यर्थः॥ससंधिसंधिर्यंभवेत्॥संधेर
पिसंधिःसंधिसंधिः॥एषकालविशेषपुण्यःअतिशयितपुण्यः॥अत्रसंधिसंधीपुण्यविशे
षग्रहणान्नसंधिकालेसाधारणंपुण्यमस्तीतिसूचितं॥अथैषांसंधीनांप्रथमाह॥संधौपु

रंध्रीशुचमेतिनंध्यामृतप्रजानायदिसंधिसंधिः॥नदंतिनास्यान्नरुनानिमूढोनिशीथमध्यंदि
नसंधिपुष्टा॥२१॥उपजातिः॥संधौतिथिसंधिःयदंतिवास्यात्॥थिनक्षत्रसंधिका
लेपुरंध्रीस्त्रीशोकंएतिप्राप्नोति॥यदिसंधिःतदापुरंध्रीवंध्यामृतप्रजाभवेत्॥अथै
षांतत्रसंगेएमध्यंदिनमध्यरात्र॥संधिकालयोःकालमाह॥नदंतीतिनिशीथमध्यंदि
नसंधिपुष्टाविवाहितांमनुनामुदांआर्नवरहितांवात्स्यामुनयोवदंतिवत्स्यापत्यावात्स्य
निशीथोर्धरात्रः॥मध्यंदिनस्यतिमध्यदिनंतेषांसंधयः॥तत्परिमाणमुक्तंग्रंथांतरे॥भ
नीःकालोनिवसतिमहानिशायांचदिनदलेयस्मान्नदशापूर्वदशापरतस्तस्माद्वर्ज्यौनिच
पलानीति॥अथशूलादिसंधिनांविशेषमाह॥ ॥शूलवैधतिवृतीयसांचयसंचमेषु
चनिंद्यिषवांतरेरेवतीप्रेषणंभद्रवंतप्यागतंद्वियुगमुत्सृजेत्॥सुधीरिति॥२२॥
रथोद्धतं॥शूलश्चवैधतश्चवरीयांश्चैषांयोगानांयत्रागतंअवांतरे॥यत्रपंच
मेषुतिथिपुपंचमीदशमिपंचदशीषु॥यत्ररेवतीप्रेषणंभद्रवंरेवतिज्येष्ठाश्लेषा
द्वंतदपिआगतादवांतराद्द्वियुगंसुधीःउत्सृजेत्॥एतेषामतादेतत्सं
पूर्वपश्चाच्चेसर्थः॥एतद्गंडांतसंज्ञं॥ ॥अथतिथ्यादीनांसंधिव्यवहारार्थंमृत्यु
गत्यानीयपठति॥नक्षत्रयोगतिथिसंधिषुनाडिकातिथ्यष्टविंशतिपलेसहि

DR BHAU DAJI

तोभयत्र॥ककालिमीननृसंधिषुदिक्पळानिस्याज्यानिशेषविवरेष्वपिपंचपंचेति॥२३॥वसं
नतिलका॥नक्षत्रयोगतिथीनांसंधिषुएकनाडिकाक्रमेणतिथ्यष्टघटीत्रातिपळैःसहितानउभय
त्रपूर्वपश्चात्रत्याज्या॥एकनाडिकापंचदशपळैःसहितानक्षत्रसंधिः॥अष्टपळैःसहितोयोगसंधिः॥द्वित्रातिप
ळैःसहितातिथिसंधिरित्यर्थः॥लग्नसंधिमाह॥ककालिमीनतनूनोकर्कवृश्चिकमीनलग्नानां
संधिषुदिक्कूपळानिदशपळैर्निउभयत्रत्याज्यानि॥एषामंतानांसर्वंपश्चात्रेति॥शेषाणांवृषादिलग्नानां
विवरेषुसंधिषुपंचपंचपळानिउभयत्रत्याज्यानि॥एषसंधिरंशानामपिदेयः॥लग्नोपलक्षणा
त्॥अथमासंधिमाह॥अमातिथिःपार्श्वतिथिर्हयेनसमंनभांगत्यमुपादधाति॥लोकंपृणा
स्त्रतिथेःप्रणेतायस्मान्नपीयूषवपुर्वपुष्मान्॥२४॥उपजातिका॥अमाअमावास्यातिथिः
पार्श्वयोस्तिथिर्हयेनसमंसहसाधंसाकंसहसमरः॥चतुर्दशीप्रतिपत्सहितेत्यर्थः॥भांगत्य
नुपादधाति॥नधारयति॥अत्रहेतुमाह॥लोकमिति॥यस्मात्कारणात्तत्रतस्मिन्नुतिथि
त्रयेलोकंपृणश्चंद्रमाः॥लोकंपृणातिअसौलोकंपृणः॥पृषोदरादित्वात्साधुः॥कर्तरिक्विप्॥शि
ष्टान्नालोकस्यपृणमुडु॥तिथेःप्रणेताभवतर्कः॥पीयूषवपुरमृतशरीरः॥वपुष्मानुज्ज्वलांग
कुर्यात्सोवपुष्मान्नास्तिचतुर्दश्यादिषुत्रिषुकृष्णपक्षएवंविधस्यचंद्रस्यास्तंगततादृश
र्थः॥चंद्रोघृतकिरणोलोकाध्यायकस्तिथिप्रवर्तकइति॥अन्यैश्चंद्रवान्मावास्यादितीयानि

श्री
॥६२॥

भिद्यु॥तत्रमनानिषेधयन्नर्कंविद्धेदोषमाह॥उदेतिचायंप्रतिपत्समाप्तौकृष्णेपिवर्धिष्णुतयाप्रशस्तः॥
द्वीपांतरस्थैर्विफलोपितावद्यावन्नपृथ्वीनयनाधनीनः॥२५॥उपजातिका॥अयंचंद्रमाःप्रतिपत्स
माप्तौप्रतिपदंनेउदेतिस्मचेत्॥सामीप्येसप्तमीप्रतिपदंतत्तत्सप्तमीषेवेत्यर्थः॥दृक्कर्मादिसंस्कारेव
ज्ञातृसउदितःचंद्रःकृष्णेपिवर्धिष्णुतयाहेतुनाप्रशस्तः॥वर्धनशीलोवर्धिष्णुःतस्यभावस्तथा॥
यथाशुक्लेवर्धमानतयाप्रशस्यतेतद्वच्चंद्रोपीत्यर्थः॥अतोबालत्वस्यदोषोनास्तीतिस्मचेतं॥तस्या
पिनिषेधमाह॥द्वीपेति॥द्विर्गताआपोयस्मिन्नतद्वीपं॥तस्मादन्यद्वीपंद्विपांतरंतत्रतिष्ठतीति
द्वीपांतरस्थैः॥देशांतरस्थइत्यर्थः॥देशांतरदृष्टश्चंद्रस्तावद्विफलः॥तावत्कर्थंयावन्नपृथ्वीनयना
धनीनोनास्ति॥पृथ्वीयद्वेनतत्रस्थजनालक्ष्यंते॥तेषांनयनानितेषामध्यमार्गःस्तस्मिन्नवं
भवतीतिपृथ्वीनयनाधनीनः॥अथनोयनूरवाविसलंगाभ्यर्थरवः॥आत्माधानोरवइतिअ
नःप्रकृतित्वं॥यद्वापृथ्वीनयनाधनिइनःसमर्थः॥पृथ्वीनयनमार्गक्षमइति॥एतदुक्तंभवति॥शा
स्त्रेणदृष्टश्चंद्रोदेशांतरदृष्टः॥इदंलंकापुरेऽर्कस्ययदोदयस्यात्तदादिनार्धयमकोटिपुर्यांभिसा
दिगोळवासनयाप्रसिद्धं॥अतःस्वदेशाद्भिन्नपरमिस्थितेर्जनेर्यन्नदृष्टस्तावद्विफळइत्यर्थः॥
अत्रादिनात्वदर्शनेनदोषइतिप्रसिद्धमेव॥अथजन्ममासादीनांनिषेधमाह॥नोजन्ममा

सतिथिषुनचाधिकोनमासेतिथौचपृथुमंगळमामनंति॥यद्ज्येष्ठगर्भजमपत्यमुपनमेतज्ज्येष्ठे
महौत्सवमवाप्य मियान्नवृद्धिमिति॥२६॥ वसंततिलका॥ जन्मनिमासितिथिभानिनपुजन्ममासि
जन्मतिथौजन्मनक्षत्रेवेति॥पृथुमंगळं चौपलोनयनविवाहादिकं नो आमनंति॥नोकूथयं
ति॥नअधिकोनेमासेअधिमासक्षयमासेचेति॥अधिकोनेतिथौचा॥दिनवृधौदिनक्षयेचेति॥
ज्येष्ठमासस्यविशेषमाह॥यद्ज्येष्ठेतियद्ज्येष्ठगर्भजमपत्यंपुत्रःकन्यावानज्येष्ठमासेमहोत्स
वंवोलोपनयनविवाहादिकंउपनेतंप्राप्तंतद्वृत्तंवृद्धिंनक्षयान्नप्राप्नुयात्॥ज्येष्ठापत्यस्यज्ये
ष्ठमासेमंगळंश्रुतंनेत्यर्थः॥अथैषांगुणदोषाणांविवेकेनेतुःप्रशंसामाह॥इत्यतींद्रियदृशोनिरूचि
रंयदुगुणागुणामयंमुनीश्वराः॥देवविद्विदितजन्मतन्मतःकीर्तिभाजमवतिलग्नलग्नधीः॥७॥रथो
द्धता॥इतियदुक्तंयदुगुणागुणामयंअगुणाश्चअगुणागुणाः तेःप्रचुरंगुणागुणानयंअ
तींद्रियदृशोदिव्यदृशोमुनीश्वरानिरूचिरंनिजगदुः॥विदितजन्मतन्मतःलग्नलग्नधीर्दैवित्
कीर्तिभाक्भवति॥तेचतन्मतंचतन्मतंभस्यतच्छद्दृस्यपूर्वेणाथच्छद्दैनाव्ययः॥जन्मचतन्मतं
चजन्मतन्मतंतैर्जैर्विदितेजन्मतन्मतंयेनासौविदितेजन्मतन्मतः॥एवंविधगुणादोषविचार
चतुरोलग्ननिहितैकबुद्धिःकीर्तिमान्भवतीत्यर्थः॥ ॥इतिश्रीसकलागमाचार्यविर्यकेशवसो
मसुतगणेशविरचितायांविवाहवृंदावनटीकायांविवाहवृंदीपिकायांलग्नषड्गुण्यदिग्बुद्धि

प्रती
॥६३॥

कारः॥ ॥छ॥ ॥छ॥एवंसर्वलग्नानांशुभमभिधायेदानींगोधूलिकलग्नविशेषशुभिरारभ्यते॥तत्रतावत्तस्य
कालंदर्शयन्स्वकवितायोग्यतांदर्शयति॥प्राचींकुंकुमचर्चितामिवदिशंमुक्ताफळस्त्रियंको
सुंभांशुकभासिनीमिवदिशंप्राचेतसींदर्शयन्॥यावद्धांतिकरग्रहंसहरविःसंध्याकुरंगीदृशाता्व
न्मंगलमंगलग्नसुरभीरेणोःकरंग्रहृतः॥९॥वंशस्थविलविक्रीडितं॥तावत्सूर्यनमंगलग्नसुरभीरेणोः
कुमार्याःकरंपाणिंग्रहृतःस्वीकर्तुःपुरुषस्यमंगलंभवति॥सुरभीणांधेनूनांरेणुःधूलिःसुरभी
रेणुःअंगेकुलप्राःसंसक्ताःसुरभीरेणवोयस्याःसातथा॥धेनुधूलिदूसरायाइत्यर्थः॥तावत्कथं॥
यावद्रविःसूर्यःसंध्याकुरंगीदृशासहकरग्रहंयाति॥कुरंग्याइवदृगिवदृश्यस्याःसाकुरंगदृक्तया॥
मृगलोचनासंध्येवकुरंगीदृक्तयासंध्याकुरंगीदृक्तया॥अत्रसंध्यासौयंसंध्येव॥तत्रसुरभीरेणोः
संसर्गात्॥किंकुर्वन्सन्॥कुंकुमचर्चितामिवप्राचींदिशंप्रतिआत्मानंदर्शयन्॥इवोत्प्रेक्षायां॥कुं
कुमेनचर्चितामंडितांतां॥दृशेर्णिजंतलाट्टकर्मकत्वं॥सायंकाळेप्राच्यांकुंकुमसदृशःस्वाभावि
कःसंध्यारागःसकुंकुममिवेत्युत्प्रेक्षाकर्थंभूतांप्राचींमुक्ताफळस्त्रियंमुक्ताफळानांस्त्रकू
फळहारःसास्तियस्याःसामुक्ताफळस्त्रियंतां॥मत्वर्थीनिः॥अर्थात्नक्षत्रमालैवमुक्ताफळ
स्त्रक्॥कामिवदर्शयन्॥प्राचेतसींदिशामिव॥प्रचेतसोवरुणस्येयंप्राचेतसीतांप्रतीचींइत्यर्थः॥

यथाप्राचीनथाप्राचेतसीमिति।।तेनप्राचींदिशंप्राचेतसींवदिशंस्थयन्नितिभावः।।कथंभूतांप्राचेतसीं
कौसुंभांशुकभासिनीं।।कौसुंभ्याकुष्याणिकौसुंभानितेरक्तंकौसुंभंतच्चनदंशुकंचतेनभासतेसातथा
।।अथवाकौसुंभारागएवकौसुंभांशुकमितिं।।यद्वाकौसुंभांशुकमिवभासतेसाकौसुंभातथा।।यावत्सायंसं
ध्यारागएतादृग्नः।।संध्यारागःसुरभिरेणवश्चदृश्यतेतावत्कालेकरयहकर्तुमंगलंस्यादितितात्पर्यार्थः।।
अथगोधूलिकंव्रतांसातदधिकारिणंश्राह्।।उक्तंणिर्णकिंविलोकनवत्सुवत्सासीनस्तनोद्घटितदुर्धर
धेनुधूलिं।।गोधूलिकंसज्जतिगोपपृथग्जनानांदोषैर्महद्भिरपिलग्नमेनूनमन्यैः।।२।।वसंततिलका
चत्वारश्लोकाः।।उद्धूर्ध्वकिर्णाःयेषांतेउक्तर्णाःतेचतेतर्णकाश्चतर्णकावत्साः।।तेषांविलोकनंतेनव
त्सावः।।गोभमानाः।।वत्सांतितावत्सांस्य।।वत्सानंगतिनिरोधः।।पीनांमांसलास्तनायासांताःपीनस्त
नाः।।उत्कर्षेणहृषिताःउद्धुषिताः।।हर्षोनिष्ठायांचेट्वक्तव्यः।।दुःखेनधर्तुंशक्यंतेनादुर्धराःउक्तर्णति
र्णकविलोकेनवत्सवंकुण्ठाःगवश्चतावत्सांस्यःपीनस्तनाउद्धुषितादुर्धराश्चतेधेनवश्चतासां
धूलयस्तासांतथा।।ताःकर्मगोधूलिकंलग्नंकर्तुंगोपपृथग्जनानांसज्जतिउत्साहयतिदृष्टांतोसौ।।
गवांधूलयस्तत्रसंतदुपलक्षितंकालेजातंलग्नंतद्गोधूलिकं।।गोपाःपशुपालकाःपृथग्जनाहीन
वर्णाःगोपादीनांगोधूलिकलग्नंएवंविधधेनवोभवंतीतिभावः।अस्यप्राशस्त्यमाह।।दोषैरिति।।

कथंभूतंलग्नं।।अन्यैर्महद्भिर्दोषैःसहितमपि।।अयंभावः।।गोधूलिकलग्नंसदासप्तमेसूर्योऽस्यव।।अयं
महादोषः।।मदनमूर्तिर्नाथस्यकलत्रं।।एतद्दोषैरष्टमभौमादिभिःसहितमपिलग्नंशुभंस
वैद्य २ वेदितिं।।यद्येवं तर्हिकेचिदष्टमेसूर्येसतिलग्नस्यांगमाकुस्त्रिरस्मरंति।।गोधूलिकेऽपि
विधुमष्टमषष्ठमूर्तिर्यन्मोचयंतितत्सूर्यस्यचित्रपंचः।।पंचांगशुद्धिमयमेवविवाहधित्स्येर्य
स्मादिदंसतमेतेस्मागतेपतंगे।।२।।गोधूलिकेऽपिअष्टमषष्ठमूर्तिर्धुकेचिन्मोचयंतितन्नस्मा
त्कारणादयंस्वरुचिप्रपंचः।।अष्टमंचषष्ठंचअष्टमषष्ठे।।नयोर्मूर्तिर्देहोयस्यासोतथा।।अ
ष्टमषष्ठेइत्यर्थः।।तद्वाक्यंच।।जामित्रंनिधिचिंतयेद्रुयुतामित्यादि।।हित्वाचद्वसंपद्मगतं
गो=स्थित=धूलिकंरविस्थनइति।।अयंस्वरुचेःस्वस्याश्चिरुचेःप्रपंचाविस्तारः।।यद्वा।।स्वरुच्या
कृतोप्रपंचोस्माभोहनंद्रानानां।।तस्मात्कुनः।।यस्मादिदंगोधूलिकंविवाहधित्स्येःसहपंचांगशु
द्धिमयमेव।।पंचांगशुद्ध्याप्रधानंपंचांगशुद्धिमयंगोधूलिकंविवाहनक्षत्रेषुसत्सुपंचांगशुद्धि
रेवमुख्या।।नत्वन्यत्।।लग्नशुद्ध्यादिकमिति।।पंचांगानित्वित्थादीनिप्रसिद्धानि।।तेषांशुद्धिः
स्वाभाविकदोषविरहः।।यथारोहिण्यादिषुविवाहेहिनस्यात्।।नहिविवाहधित्स्योरितिपौनरुक्त्यं
तन्न।।नक्षत्रस्यप्राधान्यात्।।उक्तधित्स्यामिपिक्षेतेपंचांगशुद्धिर्विलोक्येत्यर्थः।।एतदग्रेप्रपंचयिष्यामः।।

तत्कथं ॥ यस्मात्कारणादिदं गोधूलिकं सत्तत्तेनिसंभस्तगतेसप्तमगतेपतंगे सूर्यसत्तिभवेत् ॥ एतादृ
शोमहादोषस्तहीत्तेसतिकिंत्वयेषष्ठमचंद्रादयइत्तिभावः ॥ अनेनेत्रअष्टमभोमादयोपितिरा
कृताः ॥ किंच ॥ नांशोनलग्नमिहदृष्टयुतंस्वमत्रेनाकारिसोरतमसामपिसंगभंगः ॥ किंचंद्रचार
भयमेकमिहास्तुकिंचित्रात्रप्रमाणवचनंकिमपिश्रुतंवइत्ति ॥ ४ ॥ इहास्मिन्गोधूलिकेऽशो
नयांशः स्वमत्रेस्वस्वामिनादृष्टयुतंनास्तु ॥ लग्नंचस्वमत्रेदृष्टयुतंनास्तु ॥ अकारिसोरतमसां
सूर्यभौमराहूणांसंगोयोगस्तेनभंगोलग्नभंगः सोपिनास्तु ॥ एवंसतेकंचंद्रचारभयंकिम
स्तु ॥ चंद्रस्यचारस्तस्माद्भयंहित्वाचंद्रमसंषष्ठमगतमिति ॥ एतेदृशंकथमस्तीति अपिश्रुतद
पिनास्तु ॥ नचत्रागमएवप्रमाणमितिचेन्नत्राह ॥ किंचेति ॥ किंचअत्र ॥ अत्रास्मिन्चंद्र
चारविषयेनोयुक्तमेकंप्रमाणवचनंकिमपिश्रुतं ॥ अस्मिन्विषयेयद्वाक्यंप्रमाणीकर्तव्यं
नादृशंमाहर्षिसंमतंवाक्यंनास्तीतिभावः ॥ नचैत्रकिंविलोक्यमित्याह ॥ साकंरात्रौविरचि
त्रशिरबंडिसूनोर्लक्षेवळंकुळिकेयामदंडोपलंभात् ॥ प्रायेणसंकरक्षुद्रोगशुभक्षपक्षक्रूर
क्षणेषुशुभकृत्क्रूरपीडनंस्यात् ॥ ५ ॥ तत्रगोधूलिकंसत्तत्रात्रिनारेसार्धेकार्यं ॥ दृश्येरात्रौस
तीति ॥ चित्रशिरबंडिनःसूनोर्गुरुवारेनिरर्थिकार्यं ॥ भृगोरर्यास्मिन्नहरवि ॥ अस्तंगतेऽ

स्या

श्री-
॥६५॥

सतीति ॥ कस्मात् ॥ कुलिकयामदंडोपलंभात् ॥ कुलिकश्चयामदंडश्चतयोरुपलंभःप्राप्तिः ॥
रात्रौदिवाचप्रथममूहूर्तेकुलिकः ॥ अतःसार्धं ॥ गुरौतुअष्टमंयामार्धं ॥ अतोविरात्रीति ॥ केवलमिदमेव ॥
पंचागमध्येवारदोषवत्त्वात् ॥ नवत्वन्यदिति ॥ एतत्किंतत्राह ॥ प्रायेणेति ॥ संकरेणभवंतितेसंकरक्षुद्रः ॥
तेषांहिनवर्णानांकरपीडणंप्रायेणबहुत्वेनअशुभर्क्षपक्षक्रूरक्षणेषुशुभकृत्स्यात् ॥ ऋक्षंचपक्षश्चऋ
क्षपक्षौ ॥ अशुभौचऋक्षपक्षौचतौतथा ॥ अशुभर्क्षोपक्षौच ॥ क्रूरक्षणश्चतेतथा ॥ एतदुपलक्षणादुष्टयो
गादिष्वपि ॥ एषांपिहीनवर्णानांपनिपिडनंशुभंकिपुनः ॥ पंचागशुद्धाविनिभावः ॥ तथाहीनकः ॥
अन्यानामशुभर्क्षादित्यादि ॥ यदुक्तंसार्धमित्यादितत्परिमाणमाह ॥ अत्रोभयत्रघटिकादलमिष्टमाद्यंतदं
वरमणरपिनाधिबिंबः ॥ कालगर्भेतिनिपतत्येतपनाधिबिंबवेलायांयवस्थितिरियंरचयांबभूवेतिभट्ट ॥ अत्रास्मि
न् ॥ गोधूलिकेयस्मात्तत्कारणादुभयत्रअर्धास्तमयात्प्राक्पश्चाच्चघटिकादलमिष्टमाद्यं ॥ तेनस्मात्कारणात्ते
दृवरमणेःसूर्यस्यअर्धबिंबोपिकालेनग्राह्यः ॥ अर्धबिंबकालेयस्मिन सतथानहिंतदाचक्रवाक्यानिभ
र्योदितेधास्तमितेसुर्यबिंबेदृगगतइत्यादिनोगतिमारः ॥ कालगर्भेति ॥ इयंतपनार्धबिंबवेलावव
स्थितिः ॥ कालगर्भेतिनियतयेमुनिभिःरचयांबभूवोभरचिंतजनादचेतः ॥ कर्मणिलिटिभुनोन्
प्रयोगः ॥ तपनस्यवेलाकालगर्भः तस्यव्यवस्थितिरवस्थानं ॥ कालस्यभर्गलातस्यनियतिर्नियमः ॥ इ

अमधर्क्षेवं नाम्निकावेळाऽवस्थितिःकाळमध्यनियमायरत्नमालायां किंतु ॥ तत्सूर्यनक्षत्राच्च काळांतरमस्ति
अर्धघटिकात्मकनाक्षत्रनरदैर्घ्यनाम इतिभावः ॥ तथाचाह ॥ दिनांतेसूर्यबिंबार्धपूर्वपश्चाद्घटीद्वयं ॥
काळार्गलेवेवेह लायांधात्रोद्वाहायनिर्मितंजिनैः ॥ अत्रगोधूलिकेऽपिविधुमष्टमषष्ठसाद्दिय
दुक्तंग्रंथकर्त्रानत्सम्यक्विचारपदवींनाधेरोहति ॥ तथाहि ॥ यदुक्तोत्रहेतुः पंचांगशुद्धिमयमे
वविवाहधिस्थैरित्यादिनात्रदृष्टेते ॥ कापंचांगशुद्धिरिति ॥ पंचांगानितिथ्यादीनिप्रसिद्धा
नि ॥ नारदोवसिष्ठादिभिः पंचांगशुद्धिर्विरहाद्दोषस्याद्यःप्रकीर्तितइत्यादिनामहादोषप्रक
रणेऽपिहितानि ॥ तेषांशुद्धिर्दोषविरहः ॥ दोषाद्विधेव ॥ आकृतिकश्चागंतुकश्चेति ॥ यस्मिन्
कर्मणियदभिहितंनतत्तथादिकंतस्मिन्नाकृतिकोदोषः ॥ यथाविवाहेदूषणिरण्यादौ = यन्नीपात =
आगंतुकोयहाद्यजनितः ॥ यथातिथौदग्धत्वं ॥ नक्षत्रेपातवैधादिकमिति ॥ अतःपंचांगानांयत्कृ श्री-
तिकदोषएवात्रशुद्धिः ॥ नत्वागंतुकदोषविरहः ॥ तस्ययोगकरणयोरनभिधानात् ॥ अपिच ॥ शु ॥६६॥
द्धिराद्येनआगंतुकदोषविरहेऽप्यमानेवारदोषस्वार्जूरीकंसमाधिष्वमित्यादिनारदादिपठिते
षुदोषेषुपौनरुक्त्यापत्तिः ॥ एकविंशतिपरिगणनायाश्चसंभवश्च ॥ तस्मात्संचांगानांयाकृति
कदोषविरहएवशुद्धिरितिस्थितं ॥ अतएवंविधायापंचांगशुद्धिस्तन्मयमेनगोधूलिकमित्युक्तं

भवति ॥ अथयदीदृशंभूषे ॥ पंचांगशुद्धिमयमेवविवाहधिस्थैरितिनरतोऽयमाशयः ॥ विवाहविहितन
क्षत्रेसतिपंचांगानांयहाद्यजनितदोषाभावलक्षणाशुद्धिर्विवक्षिता ॥ तदपिनयोगकरणयोस्त्या
संभवात् ॥ यथासंभवमितिचेन्नदर्पिन ॥ पंचपदस्यवैय्यर्थ्यात् ॥ अतः शुद्धिराद्येनआकृतिकदोषा
भावःस्वीकर्तव्यस्तर्हिपंचांगशुद्धिवाद्येःसार्केंदुनाविसादिनाकुळिकार्धयामोकथंसमते ॥ ना
दृष्टादृतिचेन्नन्न ॥ नारदोवसिष्ठादिभिःपंचांगशुद्धिर्विरहइत्यादिपठितदोषेषुनादृष्टस्य
पृथग्ग्रहणात् ॥ तर्हिकुळिकंक्रांतिसाम्यंचेत्यागमबळात्कुळिकार्धयामोसमते ॥ यद्येवं षष्ठा
ष्टमचंद्रेणकिमपराधःसोप्यागमबळात्स्वमते ॥ नात्रप्रमाणवचनंकिमप्यस्तीतिचेन्नदर्पि
न ॥ यतआगमप्रमाणाभ्यांनिसंशय ॥ षष्ठेऽष्टमेमूर्त्तिगतेचंद्रेगोधूलिकंमतंसुपतिकं
मा ॥ कुजेऽष्टममूर्त्तिगतेऽथवास्तेनरस्यनाशंप्रवदंतिगर्गाः ॥ धिस्थंकरपुतेसाम्य ॥ मूर्तौविष्टा
ष्टमंचंद्रंकुजंनाष्टंधगं ॥ विनार्द्धंशुभमेयुंकंगोधूलिंशुभदंमतं ॥ इत्यादीनि ॥ एतानीवच
नसमतानीतिचेन्नदर्पिन ॥ अस्योक्तेयःपाक्षिकोऽपीहदोषइत्युक्तत्वात् ॥ किमुतबहूक्तेः ॥ अतः
षष्ठाष्टमचंद्रादियोगागोधूलिकेउक्तदोषास्तेऽपिस्युरितिसिद्धं ॥ ॥ इतिश्रीसकलागमाचार्य
वर्यश्रीकेशवसांबसरस्वतिजगद्गुरुविरचितायांनिबाहदृष्टावनदीपायांगोधूलिकाध्यायः ॥ ॥ ६ ॥

अथविवाहेमासगोचराध्यायोआरभ्यतेत्रादौसौरचांद्रमासयोर्विचारमाह॥चैत्रेमासिसितपक्षे तिथौभास्करेऽर्कस्यसर्वैर्मेषादिस्थैर्गगनगतिभिर्ग्रहैर्भुवःस्वःप्रवृत्तिः॥एवंयोषन्मृगमुखगतेभास्वति स्यान्नचासावुक्तः श्रेयान्परिणयविधावेंदुमासोऽस्तितस्मादिति॥१॥मृदाक्रांता॥यस्मात्कारणा च्चैत्रेमासिशुक्लप्रतिपदितिथौरवेर्वासरेसर्वैर्गगनगतिभिःरव्यादिग्रहैर्मेषादिस्थितैर्भुवः स्वःप्रवृत्तिरासीत्॥भूर्भुवःस्वरितिव्याहृतिभिरक्रमेणलोकत्रयगाचकोनि॥तथाचोक्तं॥पुलो कारव्योरक्षिपोरक्षदश्वात्तस्मात्सोम्येऽयंध्रुवःस्वश्चमरुरिति॥अथैतःपृथिवीएतल्लोकत्रया धिष्ठिताएषांलोकानांप्रवृत्तिःप्रथमनिर्माणंस्रष्टुश्चक्रंकमळोद्भवेनेति॥लंकानगर्यामुद याच्चभानोरितिचयदुक्तंतत्सोषमासेमृगमुखगतेमकरादिस्थितेभास्वतिभास्करेनासीत्॥न स्मात्कारणात्परिणयविधौचांद्रमासःश्रेयान्श्रेष्ठउक्तः॥अयंभावः॥लंकायांक्षिति जगतेर्यामेषादिस्थितचंद्रार्कयोः किलयुगपत्प्रवृत्तिः॥तत्रचंद्रार्कयोःसमकळत्वाच्चांद्रमासादिः सएवमेषगतार्केतान्सएवचैत्रमासः॥तदानीमादिसंस्थेवहोरा॥अतोऽर्कनारदादिसर्वसौ येमकरादिस्थितेऽर्केनघटते॥यतःसौरवर्षमासादेःप्रवृत्तिःसंहिताकारैर्मकरादेरवस्थीकृता उक्तंच॥मृगादिराशिदूयभानुभोगादिति॥अतश्चांद्रएवमुख्यइतिग्रंथकृतोक्तिः॥नैतच्चानुरूपं

॥ शिव॥
॥ ६७॥

प्रवृत्तिकाळेमेषादिगतार्केतानूसौरमासस्यापिप्रवृत्तेः साफळकीर्त्तनायैवास्तुतंतुमेषादेरेवग्रहग णितप्रसिद्धा॥तथाचोक्तं॥दिनंसुरेणामयनंयदुत्तरमित्यादि॥किंच॥प्रवृत्तेकाळेचांद्रदिनवर्षादि रपिप्रवृत्तेस्तस्यापिमुख्यत्वंकथंनवक्तव्यंतस्मादनयायुक्त्याचांद्रमासस्यश्रेष्ठत्वंवक्तुमनुचितमिति नुयुक्तंतरंहिनागमबळात्॥तदुच्यते॥नक्षत्रेणयुक्तःकाळःसास्मिन्पौर्णमासीतिसंज्ञा यामिनिचपाणिनिरनुशास्तिनासौषोसादिसंज्ञासौरादौनोपपद्यतेनस्माच्चांद्रमासएवमुख्यः इति॥अतएवाहनारदेऽपि॥यस्मिन्मासेपौर्णमासीयेनर्क्षेणसंयुता॥तन्नक्षत्राह्वयोमासः पौर्णमासीतदाख्यया॥तस्यशुक्लःकृष्णश्चदर्शश्चेत्युभावपि॥अभिधानंचपक्षौपूर्वा परौशुक्लकृष्णौमासस्तुतावुभावितिं॥अतएवसिद्धांतेऽप्युक्तं॥मासास्तथाचतिथयस्तुहिनो शुभानादिति॥अतःसौरादीमासप्रयोगागौणंवृत्त्यायोजनीयइत्यस्माकंसिद्धांतः॥तर्हिरवे रयनमासिनुनरायणमितिविवाहेसौरमासाःकथमुक्ताः॥नैषादप्रवृत्तिश्चनुख्यंविवाहइत्त त्तेनचांद्रमासाग्रंथांतरेउक्ताः॥अनयोर्विरोधेसतिसमुक्तिंकर्तुनिर्णयंवक्तुंपूर्वपक्षमाह॥नेदं योषोमृगयुजिरचनादनश्रेस्त्रीणांश्रेष्ठाश्रेष्ठोपजसहचरेभास्करेसुंदरीणां॥मांडमा द्यैःस्मनशुभफळस्यास्यक्तिंनोपयामेमीनाऽपिस्याद्यदिकृतफळःफाल्गुनस्यप्रसंगात्॥२॥मंदर्क



क्रांता॥सुंदरीणामुद्वाहे मृगयुजिमकरगतेरवौषोषानेष्टः॥मकरगतार्कस्यशुभत्वेपिअ
शुभषोडशयोगात्सनेष्टइतिभावः॥ननुविपरीतंकुतोनस्यादित्यत्राह॥आहतइति॥अवीणोःपंडि
तमाचार्यैर्मृगयुजिरवौषोषश्चेदाहृतःस्वीकृतःमकरार्कस्यशुभत्वात्॥तदाचैत्रेपिअजसहच
रेमेषगतेभास्करेसतिचारुःशुभःस्यात्॥नचैवमस्ति॥किंच॥अभ्यस्रसिध्यस्फालुनस्यमां
उमाद्यैःस्मृतफलशुभस्यस्रसंगाद्योगात्मीनोमीनगतोऽकोऽपिअविकृतफलः किंनस्यात्॥
अपितुंअविकृतफलएव॥नविकृतंफलंयस्यासौतथा॥यथावस्फलएवेत्यर्थः॥शुभस्याऽपि
फाल्गुनस्ययोगात्दुष्टोमीनोदुष्टफलएवेतिभावः॥नचाप्येवमस्ति॥एवंसोरश्राधार्यंस्वीक
र्नुशनिष्टहुयं॥एवंसतिसिध्यंतमाह॥इषोननिंद्योयदिफाल्गुनस्यादजस्तुवेत्रारवगतोन
निंद्यः॥मधाश्रितोहूबपिवर्जनीयोमिथादिनाचामियमेवयुक्तिः॥३॥उपजातिका॥यदिफा
ल्गुनेइषोमीनगतार्कस्तदाननिंद्यः॥मेषर्क्षचित्रानरसीसुनेस्थे॥चंद्रस्यशुभत्वात्॥एत
स्रसंगेनत्रतबंधेऽपिनिर्णयमाह॥मेषइति॥मेषोमेषगतार्कस्तुयदिवेत्रारवगतःतदाननिं
द्यः॥मेषेऽर्कचित्रानंनहीतिचेत्रेशुभस्यापिमेषस्यशुभत्वेत्रारवयोगाच्छुभत्वमितिभावः॥अ
कृतमाह॥मधाश्रितेति॥मधाश्रितोचैत्रमासगतोहूमीनमेषगतार्कोऽपिवर्जनीयो॥चेत्रा॥

रवस्यदुष्टत्वात्मीनस्थस्वरूपतएवशुभः॥मेषस्तुचैत्रयोगादिति॥चांद्रस्यशुभत्वादिति॥सर्वत्रहे
तुः॥इत्यादिनाचांद्रादिविचक्षिणांयुक्तिरियमेव॥इत्यादिकुलकवतांयुक्तिरियमुक्तेनसार्थः
यदिहिचांद्रशुभत्वंतदाऽथकूसौरमानंकथमुक्तमित्याशंक्याह॥प्रायःसौरंमानमिष्टंविवा
हेनहिंचांद्रंमासमाहुःफलेन॥यस्मात्सम्यक्तत्फलोन्नतदैक्येसौरोमासःकेवलःकिंचिदू
नइति॥४॥मालिनी॥यदिप्रायोवाकुलेनसौरमानोविवाहेस्वीकृतंतत्तदाफलेनचांद्रमासंनि
माहुः॥श्रोनकाश्यपः॥धनमानपरिक्षत्रेषुचैत्रेचान्नमैथुनात्वसतीसादिना॥यस्मादेनौसौ
रचांद्रमासौविवाहेऽनौनस्मान्नदैक्यंतयोःसौरचांद्रमासयोरैक्येसतिफलाप्तिःसम्यग्भवि
ष्यतीत्यर्थः॥केवलःसौरमासःचांद्रापेक्षयाकिंचिदूनः॥चांद्रस्यशुभत्वादिसर्थः॥एवंसोर
चांद्रयोर्बलाबलमुक्त्वागोचरशुद्धकवर्गयोर्बलाबलमाह॥योषितांगुरुपतंगगोचरशोभ
नेशुभकरःकरग्रहः॥अष्टवर्गविधिनातदर्यसूर्यशुद्धिमपरेत्रुवंतिहि॥५॥रथोद्धता॥
योषितांस्त्रीणांगुरुपतंगयोर्गुरुसूर्ययोर्गोचरेशोभनेसति॥गोचरविधिनागुरुबले सू
र्यबलेचसतीत्यर्थः॥करग्रहःशुभकरःस्यादित्यर्थः॥तदर्थंयेनस्यगोचरबलंस्यात्सयेऽत्रा

श्री
॥६९॥

केसतिअष्टवर्गविधिनाऽरुपतंगबळेसतिमतांतरमाह।।सूर्यशुध्यभिति।।अपरेऽन्येषांपुरुषाणांसूर्यशु
द्धिंजगुः।।मनुपुरुशुध्यैं।।गोचरविधिनातद्लाभेऽष्टवर्गविधिरिति।।उक्तंच।।प्राग्भानुरष्टकवर्गेति।
पुरुषाणांगुरुशुध्यिस्तुव्रतबंधएव।।अतोनविवाहे।।शुद्रादीनांतुव्रतबंधाभावात्तूद्वाहएव
गुरुशुध्यिःसूर्यशुध्यिश्चेति।।नचत्रगोचरस्यकथंमुख्यत्वंतदाह।।अष्टवर्गफलमेवजातकेनास्य
किंपरिणायेऽपिमुख्यता।।सप्तमुडुरुनजन्मभात्रियारथयामुनिभिरेवसस्मरे।।७।।रथोधृता।।
जातकेअष्टवर्गफलमेवास्ति।।तत्रयद्यंडुराशिफलंनदैवगोचरफलंतैर्दैवंसंहितासुपठितं।।अतोऽ
स्याष्टवर्गफलस्यपरिणायेऽपिमुख्यताकिंनस्यात्।।गोचरफलंघेकस्माद्यंडुराशेरेव।।अष्टवर्गफ
लंतुअष्टराशीनाम्यः।।अतोऽस्याधिक्यात्परिणायेऽपिप्राधान्यंकथंनस्यादितिभावः।।एतद्दोषपरि
हारेणपरिहारः।।सप्तमिति।।जातकेऽष्टवर्गफलंमुख्यमितिभट्टमतम्।।परिणायेपिमुख्यतेति
नसहामहइति।।कथंडुरुनजन्मभात्रियोर्विवाहेभात्रियोरमताऽयंमुनि
भिरेवसस्मरेस्मृता।।विवाहेभात्रियोर्जन्मभात्रियोर्वर्जनेदोमुनिभिरेवस्मृतइति।।अत्रोदा
हरणंमाह।।क्रूरमष्टममरिष्टंमितिष्टंसप्तमंशुभमुडोर्जिजन्मनि।।नेयमुडुरुनरीतिरिस्मृता
त्रगोचरफलेरथोधृता।।८।।रथोधृता।।जन्मनिजन्मकालेऽष्टमंक्रूरेमरिष्टमशुभमुडोर्मते।।

सप्तमंशुभग्रहंइष्टंशुभंवदमुडोरिति।।कांक्षंतिमुनयः।।इयमुडुरुनरीतिरुडुमार्गेनिगद्यते।।
तथाहिजन्मकालेऽष्टमेऽशुभग्रहोऽशुभः।।विवाहेतुशुभः।।जन्मकालेसप्तमःशुभग्रहःशुभः।।वि
वाहेतेशुभः।।अतोऽनयोर्भात्रियोर्व्यत्ययात्तमितिहेतोरत्रविवाहेगोचरपथोगोचरमार्गोरथो
धृतः।।रथैरुधृतःअतिदृष्टः।।अस्यमार्गेऽश्लेषःगोचरमार्गःपारंपर्यागतःस्फुटइत्यर्थः।।रथोध्व
तइतिछंदसोऽविनाभूतंसूचितं।। ।।इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसोमसुतजगन्ने
शविरचितायांविवाहवृंदावनटीकायांविवाहदीपिकायांमासगोचराध्यायः।। ।।छ।। ।।छ।। ।।
अथप्रातिस्विकंभावफलमुल्कायोगजमाह।। ।।चक्रस्यार्धेप्राक्षिपश्चाच्चक्रमेणक्रूराक्रूरैश्चक्रमिसा
मनंमि।।अत्रोढायाःसुभगःस्वैरिणीवाभ्यसूचेश्चक्रंनक्षितदृन्निरिति।।१।।शालिनी।।चक्र
स्यप्राक्षिप्रार्धेपश्चादर्धेक्रमेणक्रूराक्रूरैःकृताचक्रमितियोगमामनंतिमुनयः।।एतदुक्तंभवति।।
दृग्मभावभागानारभ्यचतुर्थभावभागपर्यंतंचक्रस्यपूर्वार्धं।।चतुर्थभावभागानारभ्यदृग्मभा
वभागपर्यंतंपश्चिमार्धं।।तत्रचक्रस्यपूर्वार्धेयदाक्रूराग्रहाःपश्चिमार्धेसौम्यास्तदाचक्रंनामयो
गःस्यादितिचक्रस्यफलमाह।।अत्रेति।।अत्रयोगेउढायाःपरिणीतायाःसुभगःसुष्ठुभगोयस्याः
सासुभूःतस्यांस्वैरिणीवाभ्यसूचेःस्वैरिणीत्वेपोंश्चल्यविषयेचक्रंनक्षितदृन्निर्भात्यति।।

चतुर्थस्वैरिणीप्रोक्तापंचमेबंधकीस्मृतेतिस्मृतिः॥ चतुर्थेचतुर्थपुरुषोपभोगपोंश्चल्यविषये नस्यामनो वृत्तिरतिभराचक्रवट्टूमनीत्यर्थः॥ अयंसर्वग्रहकृतोयोगः॥ ॥तनुनिमीलनगेभ्रशुभाशुभैर्धजइतीहकृतोद्वहनाधूः॥ सगुणलाभवतीसवतींगितैःप्रियमनोयमनोन्मुखविभ्रमा॥२॥ दृतविलंबितानि॥तनुर्लग्नंनिमीलनमस्मै॥तत्रगतैःक्रमेणशुभाशुभैर्लग्नस्थैःशुभैरष्टमस्थैःपापग्रहैरित्यर्थः॥अयंध्वजइतियोगः॥इहास्मिन्योगेकृतोद्वहनाधूःसगुणलाभवतीसवतींकृतमुद्वहनंयस्याःसातथा॥गुणैःसहवर्त्तमानःसगुणःसचासौलाभश्चसोयस्यास्तीतिसगुणलाभवती॥पुनःकथंभूता॥ इंगितैःस्वचेष्टितैःहावभावादिभिःप्रियमनोयमनोन्मुखविभ्रमा॥प्रियस्यभर्तुर्मनःप्रियमनः॥ तस्ययमनमाकर्षणंतत्रोन्मुखःविभ्रमोयस्यैवंविलासोयस्याःसातथा॥विभ्रमोभ्रांतिर्हावयोरितिविश्वः॥ ॥अखिलकेंद्रसवेःस्वळस्वेचरैर्शवतिनाधिरिहार्पितपुंस्कृशा॥युवतिरुज्झितकांतगृहाऽगृहेजनयितुःकुरुतेकुरुतोत्सवान्॥३॥अखिलानिचनानिकेंद्राणिचतेसवायस्तेतथा॥टचू चतुर्थेपिकेंद्रुगतैःस्वळस्वेचरैःपापग्रहैःनापिनामयोगोभवति॥इहास्मिन्योगेऽर्पितपुंस्कराश्च र्पितोदतोपुंसवरायकरोयस्याःसापरिपीतीत्यर्थः॥युवतिःस्त्रीउज्झितकांतगृहासतीउज्झितंत्य क्तंकांतंगृहंभर्तृगृहंयथासातथाजनयितुःपितुगृहेकुरुतोत्सवान्कुरुते॥कुछितानिरुतानिकु

रुतानिकुत्सिताद्याःतेषामुत्सवाआनंदाः॥गगनतोयतपस्सुश्लपैर्भुगुर्दतिरंरवमरंस्केस्वळयससो॥ धनयशोनयशोभितनुश्रियांपरिणायेनपयोरुहचक्षुषामिति॥४॥गगनंदशमंतोयंचतुर्थंनवमंतेन वमंतेषुयथानयंस्थितैःशुभग्रहैःरंरवसंज्ञैर्योगभृगुर्निगद्यते॥असौयोगःअरंमसुरवं स्वळयतिधत्तेबभ्रानिनिशाकरोतीत्यर्थः॥केनपरिणायेन॥कासांपयोरुहचक्षुषांपयोरुहंक मळंतद्वच्चक्षुर्यासांतासांस्त्रीणांकथंभूतानां॥धनयशोनयशोभिनुश्रियांधनंच यशश्चनयश्चनैःशोभतेत्साधनयशोनयशोभिनीतनोर्वपुषःश्रीकांतिःतनुश्रीःधनाढ्यो भिनीतनुश्रीर्यासांतास्तथा॥एकादशैकुजरवीरविज्ञःसपत्नेविन्नेविधुस्तपसिशमनभ्रारा श्चेत्॥श्रीवत्सएषसुखयत्यपिरूपरिक्तांसौभाग्यभोगभरसंगितरंगितांगीं॥५॥वसंत तिलका॥एकादशैकुजरवीसपत्नेशुभोषष्ठेरविजःभानिःविन्नेधनेविधुतपसिनवमेशोष नभश्चराःकुजरविज्ञानिर्वृतिरिक्तांश्चेत्स्युःतदाश्रितसोनामयोगः॥एषयोगोरूपेपरि क्तांरूपरिक्तांसौदर्यहीनातामपिस्त्रियंसुखयति॥कथंभूतां॥सौभाग्येति॥सौभाग्यस्यसो गःसौभाग्यभोगस्तस्यभरोभारस्तस्यसंगीश्चनातयातरंगितानितरंगजातायेषुतानितरं गितानितानिश्रंगमियस्याःसातथा॥सोमाभूत्सौंसरायूपारसोमाःकुर्युर्योगंकामुकं

कन्यकाऽस्मिन्॥हृताकांतंकांतनेषाविषाद्यैनैर्ऋयाशमंरंरमीतिस्वरस्यामट्॥शालिनी॥भूनौलग्नसोम्याःस्यांस्यरात्रेर्याद्वितीयद्वादशराशयोयथानथंअस्मसोम्याःपापाःकार्मुकनामयोगंकुर्युः॥अस्मिन्योगेपरिणीतकन्यकाकांतनेषासतीनैर्ऋयाशमंरंरमीति॥अतिशयेनरंरमतइतिरंरमीति॥यअेलुक्॥नैर्ऋयारमयतीतिनैर्ऋयाराभः॥नैर्ऋयापभोगीनमर्थ्येषाऽतिशयेनरमयतीति॥कयास्वरस्यानिजोपभोगकौशल्यत्वेन॥किंकृत्वा॥विषाद्यैःविषशस्त्रस्त्रीदूंधनाद्यग्निभिःकांतंभर्त्तारंहत्वामारयित्वा॥सूनोशुक्रःसांगिराःगौररश्मिर्दुश्चिक्यस्यादंगनाभ्रुद्रुमश्चत्॥आनंदोऽयंसुंदरीसांद्रसौख्यातेनानंदंबंधुयोर्विस्तृणाति॥७॥शालिनी॥सूनोपंचमशुक्रःदुश्चिक्येतृतीयसांगिराःगुरुःगौररश्मिर्भ्रंदुस्तदांगनाभ्रुद्रुमश्चत्स्यात्॥अंगनायाअभ्रुद्रुमोऽभ्रुदयःविवाहइतियावत्॥यद्वाअंगनाभ्रुद्रुमःकन्यालग्नंतदायंमानंदोयोगःतेनयोगेनसुंदरीसांद्रसौख्यासांद्रंनिबीडंसौख्यमयस्याःसातथा॥बंधुयोःपित्रभ्रातृबंधुयोरानंदंविस्तृणातिविस्तारयति॥इतिजंतर्भावः॥अथरिपुहिबुकेषुनशुक्रद्युमणिसुतैःक्रमशोःकुठारएषः॥इहविहरतिसंहृतस्वबंधूत्कटपटलेपटलेखिताभिसारा॥८॥षष्ठिमाग्राणित्रीणि॥अथोद्वादशारिषुःषष्ठेहिबुकंचतुर्थेऽष्टमेशुक्रोभौमःशुक्रःप्रसिद्धःद्युमणिसुतःशनिः॥एभिः

स्त्री॥७१॥

क्रमशःस्थितैरेषकुठारनामयोगःस्यात्॥इहाऽस्मिन्कुठारयोगेपरिणीताविटपटलेभंडसमूहेविहरति॥क्रीडते॥कथंभूता॥संहृतोमारिनःस्ववैरंयाभ्यांसातथा॥पटेनस्त्रांचलेखिनःअभिसारोयाभ्यांसातथा॥अथसंग्रामसिसारिणीत्यर्थः॥नरभोगार्थिनीयातिसंकेतंसाभिसारिकेत्यभिधानात्॥यद्वाअभिचारेतिपाठः॥अभिचारोमभिचारस्तत्साठेयभिचारिणीत्यर्थः॥

पि५ रविकविरविजेंदुभिःक्रमेणाभयधनबंधुधनव्ययेषुमएषः॥इहविहितकरग्रहाग्रहाणित्रयतिषुत्रिंशत्तयापरःस्मृतानि॥९॥शविःसूर्यष्ठवूभिःशुक्रोरविजःस्मृतानिरिंदुश्चंद्रः॥एभिर्ग्रहैर्मयोद्वादशांधनंद्वितीयंषट्षट्कांनिधनमष्टममेषुयथाक्रमंस्थितैः॥एषःकूर्मनामयोगःस्यौ॥इहास्मिन्योगेनिहितःकृतःकरग्रहोयस्याःसातथा॥परःस्मृतानिगृहाणित्रयमिति॥तेभ्यःपराणिपरःस्मृतानिपारस्मरादित्यसूत्रं॥यद्वापरशब्दोनिपातइतिभोजभोजराजः॥स्मृतेभ्योऽधिकानीत्यर्थः॥कयाहेतुभूतया॥भुक्षिष्यतयादारत्वेनभुक्षिष्यायाभावोभुक्षिष्यता॥सतलोपावचनस्येतिकुंचद्भावः॥नियोज्यःकिंकरःप्रेष्योभुक्षिष्यःपरिचारकइत्यमरः॥भवपरिपावविक्रमैःक्रमेणाद्यमलिमहीसुतसौरिभिःसनाथैः॥परिणामतिदलेंदुरिंदुसूरमाःकुलेयुगलोधृतिधुर्यतांविधास्यन्॥१०॥भवएकादशः॥परिणामःषष्ठैविक्रमस्तृतीयः॥एभिःस्थानैः

द्युमणिः सूर्यः महीसुतो भौमः॥ सूर्यस्यापसंसौरिः शनिः तैर्यथाक्रमं सनाथैर्युक्तैः कृताद्धेंदुरर्धश्चंद्रो नाम योगः स्यात् तद्विपरिणतिपरिपाकं प्राज्ञाः जानंति॥ किं करिष्यन्॥ इंदुमुरगाभ्रं द्वयदनायाः स्त्रियाः कुलयुगलोद्धृतिं धूर्यतां निधास्यन् करिष्यन्॥ कुलयुगलं पितृकुलं भर्तृकुलं चेति॥ तस्योद्धृतिरुद्धरणं॥ धुरं वहतीति धुर्यतस्याभावो धुर्यता पुंस्त्वं पूर्ववत्॥ कुलयुगलोद्धृतेः धुर्यतां अग्रेसरतां विधास्यन्॥ अयं योगः वध्वा कुलद्वयस्योद्धरणं करिष्यतीत्यर्थः॥ अयनिधन तनुसुमंदचंद्रारुणकिरणैर्मुसलं जगुर्मुनींद्राः॥ इह वृत्तिकुलांतकेकुमारीकुलमारीनच काधिकार्यसिद्धिः॥११॥ ओपछं॥ दसिकं॥ अथोद्वादशांनिधनमष्टमं तनूर्लग्नं स्त्रियां मूर्तिस्तनुस्तनुरिस्मरः॥ तेषु यथाक्रमं मंदः शनिः चंद्रः प्रसिद्धः अरुणः किरणः स्मर्मः॥ तैः स्वैः तैः कृतामुसलं नाम योगं मुनींद्राजगुः॥ इहास्मिन् वृत्तिकुलांतकेयोगे वृत्तयो याद्दवाः॥ तेषां कुलं तस्योतकं संहारकं मुसलमित्यर्थः॥ ऋक्षैर्यदैवैः शनिव्रजति यद्वृष्टं मुसलं तेन निर्मितं तन्मुसलं यादवानिनष्टइति भागवतादौ प्रसिद्धेः॥ अस्मिन्मुसलेयोगे कुमारीकुलमारीकुलनाशिनी भवति॥ नकचकाधिकार्यसिद्धिर्भवति॥ केवलंकुलनाशिन्येवेत्यर्थः॥ ननुनवमगैः क्रमेणायो गोबुधविबुधार्चितपंगुभिर्गदितः स्यात्॥ इहयुवतिरहंकृताकृतार्थानिर्वितरतिदेवतदेवतसरा

स्त्री-
॥७२॥

वा॥१२॥ कुष्ठितार्यं॥ तनुर्लग्नं नवनवमं भवनैकादशांतेषुगैस्तैर्यथाक्रमं बुधः प्रसिद्धः॥ विबुधार्चितो गुरुः पंगुः शनिः॥ एभिः कृतागजो नाम योगः स्यात्॥ इहास्मिन्योगे युवतिः स्त्री अहंकृताहंकारग्राह्यासती कृतार्थान् कृतानिष्पादिताश्चतेऽर्थाश्चतान्वितरतिं ददाति॥ वाङ्मथवायुवतिः देवतदेवतस्तरास्यात्॥ देवतंनिचदेवंचदेवतदेवानिति पुतस्तरा॥ देवार्चनरतामाभ्यस्तांचेत्यर्थः॥ भाग्यवतीतियावत्॥ इतिस्त्रीसकलागमाचार्यवर्यश्रीकेशवसांबसरसमजगणेशविरचितायांनिबाहसंदर्भवनटीकायांविवाहदीपिकायांग्रहयोगाध्यायः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ पूर्वमिपराक्रमेसाहिनासाधारणेनग्रहफलान्युक्तानि॥ अधुनाग्रहनिस्थानंनानिसविशेषाण्याह॥ तत्रादौलग्नस्थग्रहाणांफलानि॥ चिरंजीवांजीवः कविरविरलानंयशुभगोरात्मांकोवा पुत्रोयमयुवतिपार्श्वप्रणयिनौ॥ बुधोभर्तुर्मृगाक्षीमृगदृशमलीलांनिरूपितत्रयीमूर्तिर्मूर्तांसुजनतिविशस्त्रगदिनिधनं॥१॥ शिरवरिणी॥ मूर्तौलग्नस्थितोजीवोमृगदृशंस्त्रियंचिरंजीवांसंजातिचिरंजीवतीतिचिरंजीवा॥ चिरमिसमयं॥ विभक्तिव्रतिरूपकं॥ कविः शुक्रः अविरलानंदसुभगोरात्मांकोवा॥ अविरलोनिबिडोश्लाघ्यश्चावनंगश्चभनेगमदनः तेनसुभगसौभाग्यवती॥ शशांकश्चंद्रः उनपुत्रोभौमस्तोयमयुवतिपार्श्वप्रणयिनौस्तः॥ यमस्यायुवतिः नस्याःपार्श्वंसामिप्यं तत्रप्रणा

थः प्रीतिरस्तियस्याः सातथातां॥यमलोकःकक्षिणीमिस्यर्थः॥बुधोवर्त्तुःभक्तांसृजति॥श्रीस्त्रीअग्निः॥
शास्त्रंधनसिध्यंतेऽस्मादितिधनंविद्याशास्त्रादिनितेभ्योनिधनंयस्याःसातथातां॥अथधनभाव
स्य॥नितांतंधनि+नीयेनीधनेसितसितांशुजीवेदुजारुजादहनदस्युभिर्विधुरतोधनंदनः॥सु
तेषुपिमितंपचांमळिनमूर्तिमर्कात्मजःस्त्रियंसहजदुर्भगांजनयतिद्युनीनांपतिः॥२॥पृथ्वीवृत्तं॥
धनेद्वितीयभावेस्थिताःसितसितांशुजीवेदुजानितांतधनिनींजनयंति॥सितःशुक्रःसितांशुश्चं
द्रः॥जीवोगुरुरिंदुजोबुधः॥नितांतंधनंनितांतधनंतदस्यस्याःसातथा॥धरानंदनोभौमःरुजा
दहनदस्युभिर्विधुरतांजनयति॥रुजारोगः॥अपंचैवहलैतानामितिस्त्रीपूदहनोऽग्निःदस्यु
वश्चोराःसर्पादयोवा॥विधुरापत्तिर्हीनातस्याभावोविधुरतावैधर्यं॥कुत्संपूर्वंवनम्॥अकर्त्मिजःश
निःसुतेषुपुत्रेष्वपिविषयेमितंपचांमळिनमूर्त्तिंजनयति॥मितंपचतीतिमितंपचा॥कृपणा
कृपणो)मितंनखेचतिखनतिखित्वानमुमुन्॥मळिनामूर्तिर्यस्याःसातथा॥द्युनीनांपतिःसूर्यःस
जदुर्भगांदुर्भगांजनयति॥सहजातंसहजंस्वाभाविकंतदुर्भगंअदैवंयस्याःसातथा॥यद्वासह
जेसादरविषयेदुर्भगोयस्याःसातथा॥अथतृतीयस्य॥इनसूनीसहजेसधनांवधूंतनुधनां
सचिवःसुभगांसूरीसुकृतिनींकुरुतःकुजसोमजोनयतिदेवरिदेवरिपूपनीः॥३॥इतविलंबितं

सहजेतृतीयभावेइनसूनीरविसूनीवधूंसधनांधनसहितांकुरुतः॥सचिवःशुक्रःशुचिर्बुद्ध
स्पतिःतनुधनांकरोतितनुकृद्धनंयस्याःसातथा॥सूरीचंद्रः॥सुभगा॥सुष्ठुभगोभाग्यंयस्याः
सातथा॥कुजसोमजौभौमबुधौसुकृतिनींकुरुतः॥सुकृतंपुण्यंतदस्यस्याःसातथा॥देवरिपूप
नीःशुक्रःदेवरिदेवरंनयतिप्रणयतिदेवरगामिनीत्यर्थः॥देवानांरिपवोदैत्याःतानुपनयतेऽसौ
देवरिपूपनीः॥दैत्यगुरुः॥देवेंद्रमित्रकाशंतः॥समोनुदेवेंद्रदेवरानित्यभिधानात्॥अथचतुर्थ
स्य॥दारिद्र्यंरविरवनीसुतोवरांगंव्याघातंगुरुभृगुजेंदुजाःप्रभुत्वं॥बाल्येऽल्पःस्त्रियविमुक्ति
र्यानिस्तनांभःशून्यत्वंसृजतिसुखेसुहासिनीनां॥४॥प्रहर्षिणी॥सुखेचतुर्थभावेरविर्दारिद्र्यंस
जतिअवनीसुतोभौमःवरांगंव्याघातंवरांगंभीरःतस्यव्याघातोभंगःगुरुभृगुजेंदुजाःप्रभुत्वं
सृजति॥गुरुर्हिस्पतिःभृगुजःशुक्रःइंदुजोबुधःप्रभुत्वंस्वामित्वं॥अल्पेस्त्रियांस्त्रियाःबाल्येबाळे
स्त्रियविमुक्तिर्भर्तृवियोगः॥यानिस्तनांभःशून्यत्वं॥स्तनयोरंभःस्तनांभःस्तस्यबुधेतस्यशून्यत्वं
अभावंसृजति॥कासांसुहासिनीनांयोषितांगनानां॥चिरंस्त्रीतुसुहासिनीसमरः॥अथपंचमस्य॥
ससुतामसुरसुरेज्यसोमपुत्राःपुत्रार्किरविरसुतप्रजांदुजेंद्रः॥रोगकानामवनिसुतःसुतस्थ
ऐनिःसंतानेसततरुजंसृजेत्कुमारी॥५॥प्रहर्षिणी॥असुरैश्चैरोसुराश्चासुरसुरासेव्या



मौजौशुक्रगुरू सोमपुत्रोबुधः॥एतेसुतस्थाःपंचमभावस्थिताःकुमारीःससुतांसृजेयुःकुर्युः॥रवि
पुत्रश्रीःसृजेत्॥पुत्राणमरिःपुत्रघातिनी॥द्विर्जेद्भ्रद्वोऽसुतप्रजासुतेभ्योऽन्याऽसुताऽप्रजा
यस्याःसातथा॥कन्याप्रसूः॥अवनिसुतासोमःशीकांशीकेनऋतांपतिता॥एतैरेवस्यापि
स्वमेतैःस्वैःसंतानेसंततिविषयेसततरुजेसततंनिसंरुग्गोगयस्याःसातथांसृजेत्
अथषष्ठे॥विधुर्निधनमिंदुजःपरभयंजयंभानुमानूकुजःकुशलमर्कभूर्विगतवैरतांवैरि
गः॥रिपुस्मुषानाःसमंसहचरेणचारुचुंबनक्रियंचसांपतिःपतिमजातशत्रुश्रुतिं॥द्रु
तविलंबितंवृत्तं॥वैरिगःषष्ठभावगःविधुश्चारुचुंबनाचारवाक्चुंबनोयासांनाश्चारुभ्रुवः॥तासांस्त्री
णांनिधनंमनक्रियंप्रकटयतिदर्शयतीत्यर्थः॥इंदुजोबुधःपरभयंशत्रुक्षयं॥भानुमानू॥
भानवोरविमयःसंप्रस्यासौतथासूर्यःजयं॥कुजोभौमःकुशलंक्षेम॥अर्कभूरिवतीत्यर्कभूः
शनिर्विगतवैरतांविगतंवैरंयस्याःसाविगतवैरातस्याभावोविगतवैरता॥प्रायसुस्त्रं॥
सुतानाःशुक्रःसहचरेणभर्त्रासमंसाध्वीरिपुसंशत्रुतं॥सहचरतीतिसहचरः॥चारुसांपतिः
बृहस्पतिःभर्तारंअजातशत्रुश्रुतिंमनक्ति॥शत्रूणांश्रुतिःश्रवणंअजातशत्रुश्रुतिर्यस्या
सौतथा॥शत्रुरितिभवणमपिनास्तीत्यर्थः॥अथसप्तमे॥बुधोबंध्यामिंदुपरिचितसप(त्नी

परिभवांगलद्गर्भांपंगुःपरनररतांदानवगुरुः॥अवीरामस्तेर्कोगुरुरमरसेवामसनिनी
विवाहेभाहेयःस्त्रियमतिरजस्कांजनयति॥७॥द्रुतविलंबितं॥विवाहेविवाहकालेऽस्तेस
प्तमभावेस्थितोबुधःस्त्रियंबंध्यांजनयति॥इंदुभ्रेंदुःपरिचितसपत्नीपरिभवांसपत्न्याःसं
बंधीपरिभवःसपत्नीपरिभवःपरिचितःपरिवृढःसपत्नीपरिभवोयस्याःसातथा॥पंगुः
शनिःगलद्गर्भांगलंतंभ्रूणंतोगर्भोयस्याःसातथा॥दानवगुरुःशुक्रःपरनररतांपरपु
रुषगामिनीं॥अर्कःसूर्यःअवीरांनास्तिवीरोभर्तायस्याःसातथा॥गुरुःअमरसेवाव्यसनि
नींअमरसेवायांव्यसनंविद्यतेयस्याःसातथा॥भाहेयोभौमःअतिरजस्कांजनयति॥अति
शयितंरजोयस्याःसौतथा॥प्रदरव्याधियुक्तामित्यर्थः॥अथाष्टमे॥सितसितकिरणेऽसा
मरसवेश्मसुवेश्मनवरतसुतायुःसंपदेसूर्यसौरी॥भवतिपतिरशरीरद्रोहकृद्द्रोहिणे
योर्बुहिणगृहमुखीनांयक्ष्मणक्षीणजन्मा॥८॥मालिनी॥मरसुवेश्मनिअष्टमगावेसि
तसितकिरणेऽसाःबुहिणगृहमुखीनांस्त्रीणांमरणायभवंति॥सितःशुक्रःसितकिरणश्चंद्रः
ईज्योगुरुः॥बुहिणोब्रह्मनस्यगृहेपद्मतद्वदमुखंयासांनाम्नातथा॥सूर्यसौरीरविशनीअ
नवरतसुखायुःसंपदेभवतः॥सुखंचआयुश्चसंपच्चसुखायुःसंपत्॥द्वंद्वैकत्वंबलंच॥

अनवरतमखंडितं च तत्सुखायुः संपन्नस्मे॥ रोहिण्याश्रपसंरोहिणीपो बुधः पतिनारीरंतस्यद्रोहः
अपघातः नंकरोतितथा॥ क्षीणेजन्मात्सोमः यक्ष्मणाश्रयभवेत्॥ अथनवमे॥ शशिसुतगुरु
शुक्राः सांद्रसौभाग्यलीलासरलहसितकांतस्वांतकलंकुमारीं॥ रविरविसुतवक्राः कैतवक्रांत
नूलीलांतपसितुहिनरश्मिस्त्रीसवित्रीकरोति॥ ६॥ मालिनी॥ तपसिनवमभावे शशिसुतगुरुशुक्राः
कुमारीं सांद्रसौभाग्यलीलासरलहसितकांतिस्वांतकलंकुर्वंति॥ शशिसुतोबुधः गुरुरुक्रोऽप्यसि
धौ॥ सांद्रंनिबिडंचतत्सौख्यंचभाग्यंचतस्यलीलायस्याः सातथा॥ सरलंऋजुतच्चतद्धसितंच
तत्तथा॥ कांतस्यभर्तुः स्वांतंमनः कांतस्वांतंसरलहसितेनकांतस्वांतेकलिः क्रीडायस्याः सांत्व
येनसातथा॥ रविरविसुतवक्राः कैतवक्रांतनूलीलांकुर्वंति॥ रविः सूर्यः रविसुतः शनिः। वक्रो
भौमः॥ कैतवंकपटं तेनक्रांतंयुक्तं शीलंयस्याः सातथा॥ तुहिनरश्मिश्चंद्रः स्त्रीसवित्री
करोति॥ सूतेसासवित्रीस्त्रीणांसवित्रीकन्याऽसः॥ अथदशमे॥ शशिसुतियमगोचरक्र
कामन्यकार्यैर्विधुरतिविधुरांगी शशिनीभाभिवक्रः॥ रचयतिरविरुग्रांकोविदः कर्मणि
क्षामविकृतसुकृतश्रीमालिनीभार्यशुक्रौ॥ १०॥ मालिनी॥ भाभिर्दशमभावे शशिनंक्रमशो
अनियमगोचरचयतिकरोति॥ नियमेनरहितंगोचरंयस्याः सातथा॥ शुचिसहनामिसर्थः॥

विधुश्चंद्रः अन्यकार्यैः परकर्मभिः अतिविधुरांगीरचयति॥ अतिव्याधितंविधुरालिंविकृत्य
निश्चंगानियस्याः सातथा॥ वक्रोभौमः शशिनी॥ शशिनीक्षुद्रदेवताविशेषः॥ शशिनीवक्र
शिनीमांसभक्षकेसर्थः॥ रविः सूर्यः उग्रांश्रेष्ठांलोकान्॥ कोविदोबुधः कर्मणिज्ञां॥ कर्मणिक्षुद्रक
र्मविशेषः तज्ज्ञानातीतितथा॥ आर्यशुक्रोगुरुशुक्रो शविकृतसुकृतश्रीमालिनंश्चयतः॥ सु
कृतंचश्रीश्चसुकृतंत्रियोपुण्यलक्ष्म्या शविकृतेरूर्णाचेतसुकृतश्रियोचताभ्यांमालतेशोभ
तेसातथा॥ अत्रमालिनीछंदसोऽपिनामस्मरंतं॥ अथैकादशे॥ एकादशेद्रव्यशातांशुभु
खाःसुखानिरत्नांबरद्रविणभोगभरोन्मुखानि॥ पाणिग्रहेदृष्टतिदीर्घदृग्भिर्गृहेड्याः सर्वे
पिसर्वभवनेभवलग्नेकिंचित्॥ ११॥ वसंततिलका॥ दीर्घदृक्कुलाचनयासांताःसास्त्रीणांपा
णिग्रहेएकादशस्थानेद्रव्यशातांशुभुखाः द्रव्यशातानिअंशवः किरणायस्यासौतथासमुख
मार्तंडेषांतेसर्याद्यायहेड्याः रत्नांबरद्रविणभोगभरोन्मुखानिसुखानिदृष्टानि॥ रत्नानिच
अंबरादिचद्रविणंचतेषांभोगः तस्यभरोभारः तस्माद्रत्नसुखानिउदितानि॥ अथश्लोका
नुरोधेनाति अत्रैवग्रहाणांभावफलेआचार्यस्माह॥ सर्वेऽपीति॥ सर्वेपिग्रहाअवष्ठाः स्था
नादिबलहीनाः संतः सर्वभवनेष्वपिकिंचित्शुभमशुभंवानद्युः॥ अर्थो

देतस्फलमुक्तं तत्सबलानामेवेति॥अथव्यये॥व्ययेशुभाःसद्व्ययकर्मनोद्यानिःसुरारुचिंरन्ध्र
तिदुर्धियांविधुश्च॥अदक्षिणावयवत्रंसंकुलोरविर्विरूपयत्यतिरुचिरामपिस्त्रियं॥१२॥
रुचिरावृत्तं॥अथद्वादशराशिस्थाःशुभाः बुधगुरुशुक्राः स्त्रियंमध्यमकवितांरन्ध्रयंतिकुर्वंति
संश्रासोभयश्चतेनकथिताकैकूरात्संज्ञा ज्ञातां॥द्यानिःसुरारुचिं॥सुरेज्यदेवपुश्चरुचिर्यस्याः
सातथा॥विधुश्चंद्रः दुर्धियानैर्धियादुर्धियोदुष्टकर्मा॥कुजोभौमः अदक्षिणावयवरुजं
व६ अदक्षिणश्चासौवयवश्चतत्ररुगेवायस्याःसातथा॥वामांगमाधितो॥रविरतिरुचि
य७ रामतिसुंदरीमपिस्त्रीं॥विरूपयतिविरूपांकरोति॥रुचिरेतिछंदसोऽपिनाम॥अथैषां
भावफलाद्दीनांप्राग्वस्समाह॥इतिमुनिजनमतमनुचिंतकेंप्रतिगृहरचरोद्यदुर्कः॥प
रिविगणय्यविशेषमशेषंफलमिदमशेषमनुश्लिनरत्वं॥१३॥इसनंतरोक्तेइंदुलग्नादि शिव
भावस्थिनयहाणांफलं॥अशेषंसमस्तमनुश्लिनरत्वंपचनु॥नन्वश्लिनाअनुश्लिता ॥७६॥
अनुश्लिनारत्नायेननतत्कथा॥अस्यकेमयादिं॥यथावद्भवतीत्यर्थः॥कथंभूतंमुनिज
नमतंमुनिजनानांसंमतं॥अतनुःपृथुःवितर्कोयस्यतत्तथा॥यद्यप्युक्तानार्थभवद्भुयते
तथापिग्रहबलादिविचारवत्त्वाद्बहुवितर्कमित्यर्थः॥पुनःकथंभूतं॥प्रतिगृहेति॥गृहंगृहं

प्रतीतिप्रतिगृहं॥चरंतीतिचराःतेचतेरवचराश्चतेभ्यउद्भवतीतिप्रतिगृहरव
चरोद्यन्सउदर्कःउत्तरकालिनंशुभाशुभंफलंयस्मिन्तत्तथा॥किंकृत्वा॥अशेषंपरिविग
णय्य॥द्यानुकूल्यमस्यांसविशेषंबलाबलरूपंनिर्णीयेत्यर्थः॥॥इतिश्रीसकलागमाचार्य
वर्यश्रीकेशवसोमसुतश्रीजगन्नाथविरचितायांविवाहवृंदावनटीकायांविवाहदीपिका
यांग्रहाणांभावकुटुंबिकाध्यायः॥॥छ॥॥छ॥॥श्री॥॥अथोक्तभावफलानांअ
वहारार्थमुपसंहारादिकंतथाग्रहयुतिशुभाशुभयोगादिकंतद्भावंचनिरूपयन्ग्रहब
लाध्यायआरभ्यते॥तत्रादौभावफलोपसंहारादि॥षट्त्र्यायेष्वशुभाःशुभायनिध
नद्यूनांत्यवर्ज्यंपरेत्र्यायार्थेषुशशीमृतौरविरनीपंगायतत्रापरे॥क्रूरश्चद्यूनवृतान्वित
शशीननूत्रस्तसितस्तौविधुर्लग्नेसोमसिताधिपाद्विषसितःसेदुर्विनिष्टेंदुपः॥१॥ग
दुर्बलविक्रीडितं॥षट्षष्ठेत्रयस्तृतीयेभायएकादशेएषशुभाःपापग्रहाःशुभायभवंति
नीषेशुभाय॥निधनमष्टमंद्यूनंसप्तमंत्र्यंद्वादशं॥एतानिवर्जयित्वान्यत्रवसुस्थ
नेषुपरःसोम्यथहाःबुधगुरुशुक्राःशुभायभवंति॥नीषेषुशुभाय॥निधनद्यूनसप्त
शशीचंद्रःआयार्थेषुतृतीयेकादशद्वितीयेषुशुभायभवेत्॥नीषेशुभाय॥तत्रादौ

सर्वेषांविशेषमाह।मृताविति।मृतोऽष्टमेऽनिरवीशुभायभवतः॥नवशुभाय॥अत्रराशि
सुपलक्षणात्राहुरप्यष्टमेशुभः॥तत्स्वरूपंनरंकेनुश्च॥राहुफलंस्मरवेरतिदुःखोक्तेः॥त
त्राष्टमस्थानेपरेऽन्येचंद्रभौमबुधगुरुशुक्राःभंगायभवंति॥लग्नभंगकर्तारइत्यर्थः॥अस्या
नाःपिलग्नभंगानाह॥क्रूरद्यूनेति॥शशिनतनुक्रूरद्यूनदृष्टान्वितेभंगायभवतः॥द्यूनंदृष्ट
दृष्टंयस्तद्यूनदृष्टं॥तेचतेऽन्वितेचद्यूनदृष्टान्वितेक्रूरेणद्यूनदृष्टान्वितेतेसतथा॥चंद्रस्पल
ग्नस्यवासप्तमंक्रूराक्रांतंभवेत्॥यद्वाचंद्रोलग्नंवाक्रूरान्वितंभवेत्तदालग्नभंगःस्यादित्यर्थः॥अस्तसप्तमलग्नस्थाच्चंद्राद्वासितज्ञौशुक्रोबुधौवासोपिभंगाय॥लग्नेविधुश्चंद्रोभंगाय॥
द्यूनेषष्ठेसोमसितावधिपाःभंगायस्युः॥सोमश्चंद्रःसितःशुक्रःअधीधिपाःस्वामिनःलग्ना
द्राशीनां॥अत्रषष्ठेनग्रहादेवानतुचंद्रात्सोमग्रहणात्॥सितःशुक्रःसंद्युःसचंद्रःसं
गायः॥शुक्रश्चेच्छुक्रेचंद्रइत्यर्थः॥अंशायानवांशाधीशोविनष्टोदृष्टोगतोभंगायस्यात्॥अथ
सप्तमदृश्यमचंद्रस्यविशेषमाह।अतूर्यकायकेंद्रगःसुहृत्स्वसौम्यवर्गयुक्॥सुहृच्छुभे
क्षितःशुभःराशीमयूरबर्हांसलः॥२॥ग्रामणिका॥तुर्यंचतुर्थं॥कायोलग्नंतभ्यामन्यानि
अतूर्यकायानितानिचतानिकेंद्राणिचतत्रगःसप्तमदृश्यमगइत्यर्थः॥राशीशुभःस्यात्॥

कथंभूतः॥सुहृदित्यादि॥सुहृच्चस्वश्चसौम्यश्चतेषांवर्गःतेनयुक्तोतिनथा॥सुहृद्वर्गः
स्ववर्गःसौम्यवर्गोनवेत्यर्थः॥सुहृच्चशुभश्चताभ्यामीक्षितः॥सुहृद्दृष्टःशुभदृष्टश्चेति॥बर्ह
मांसमस्यसोमांसलः॥सिध्मादित्वयश्चेतिमत्वर्थीयलः॥मयूरवत्किरणोमांसलः॥
रश्मिभिःपुष्टइत्यर्थः॥सप्तमदृश्मेऽपिचंद्रएवंविधःस्यादित्यन्वयः॥अत्रापिअकाय
कोणकेंद्रइतिपाठः॥तत्रायंकायकोणकेंद्राणिचतुर्थदृश्मसप्तमानवमपंचमानि॥तथा
चानूनकः॥त्रिकोणसप्तमांबरत्रयेपगोविलग्नतः॥हिमद्युतिःशुभर्क्षगःशुभेक्षितश्चशोभन
इति॥अत्रत्रयस्थेपिगृहीनः॥सनुनारदेनमहादोषपुपठितोऽसौतोसौग्रंथकृतास्फुटः॥
अथशुभयोगानाह॥शशिनितनयसिताभ्यांनेक्षितौद्वावुभाभ्यांजयइतितनुयातजीवइ
षजीवः॥असुरसुरगुरुभ्यांस्थावरोद्वेअशुक्रैर्विजयइतिशुक्रंनंत्रजीमूतमाहुः॥२॥
मालिनी॥तनुयातइतिप्रत्येकंसंबंध्यते॥शशिनितनयोबुधःसितःशुक्रःताभ्यांतनुगताभ्यांक्र
मेणानंदभद्रौभोगोस्तः॥बुधेनलग्नगतेननंदःशुक्रेणभद्रइति॥उभाभ्यांबुधशुक्राभ्यांल
ग्नगताभ्यांजयइतियोगः॥असुरसुराणांगुरुःशुक्रजीवोताभ्यांतनुयाताभ्यांस्थावरइ
तियोगः॥द्वेजयशुक्रैःबुधगुरुभ्रिस्तनुयातैर्विजयइतियोगः॥तमेवयोगंविशुक्रंशु

ऋक्षर्जितं बुधगुरुभ्यांलग्नगताभ्यामित्यर्थः॥ जीमूतेनामयोर्गमाहुर्मुनयः॥अथैषांफलमाह॥
इतिशुभफलयोगाः सप्तसप्तर्षिमुख्यैर्मुनिभिरभिहितास्तेजन्मयात्रास्वपिस्युः॥भजंति
युवतिरभिर्रूपसीमंतिनीत्वंग्रहयुतिबलयोगादुनराधर्यमस्मिन्॥४॥मालिनी॥इति
सप्तशुभफलयोगाः सप्तर्षिमुख्यैर्मुनीद्रैरभिहितास्तेयोगाः जन्मयात्रास्वपिस्युः॥नकेवलं
जन्मविवाहे किंतुजन्मकालेयात्राकालेचशुभफलाइत्यर्थः॥तत्किंशुभफलमित्याह॥भज
तीति॥एतैर्योगैर्युवतिभिर्रूपसीमंतिनीत्वंभजति॥भरूपस्यसीमंतिनी॥तस्याभावोरूप
सीमंतिनित्वं॥नारीसीमंतिनीस्मरः॥राजपत्नीभवतीत्यर्थः॥अस्मिन्शुभफलेग्रहयु
तिबलयोगादुनराधर्यंस्यात्॥ग्रहाणांयुतियोगः॥तत्रबलयोगःस्वबलत्वं॥तस्मादुन
नरंचअधस्तनंचउत्तराधरंतयोर्भावःउत्तराधर्यं॥योगकर्तृग्रहाणांबलवत्ता शुभफल
स्याधिक्यंभूयस्त्वंचकथ्यमितिभावः॥अथाशुभयोगानाह॥दिनकररुधिराभ्यांल
ग्नपाताब्जवक्रोक्षयइतिरविपुत्रेसैंहिकेयतमस्कं॥ननुग्रहयुतिकेतावंतकस्तेषुयो
ऽयंसननिधनताभिस्तप्यतेपंकजाक्षी॥५॥मालिनी॥तनोर्गृहंतनुगृहंतेनयुक्तौनि
तनुगृहयुक्तस्तस्मिन्लग्नतइत्यर्थः॥एतत्सर्वंकंसंबध्यते॥दिनकररुधिराभ्यांलग्नगता

श्री
॥७८॥

भ्यांक्रमेणाब्जपाताब्जवक्रोयोगौस्तः॥रविणालग्नेनब्जेभौमेनपाताब्जवक्रइति॥र
विपुत्रेणेतोलग्नेसतिक्षयइतियोगः॥सैंहिकेयराहोलग्नगतेसतितमस्कमितियोगः॥के
तोलग्नगतेऽतकइतियोगः॥एवंपंचांतनुयोगेषुपंकजाक्षीनारीशोकमरणनिधनताभिः
तप्यते॥कर्मकर्त्रीस्वरूपंनिधनताभिरितिकरणंयद्वाकर्मणिरूपंतदानिधनताभिरितिक
र्त्री॥एतत्सर्वंकंफलं॥अथाप्रदुष्टयोगद्वयमाह॥तनुतुहिनमरीचीरंगनाखेटदृष्टोचर
गृहगतयोःस्यात्कोनयुग्मंकुमार्थाः॥अविहितबलिनश्चेद्यायिनोयुग्मदाबशुभदृग्भ्यां
यतेकन्यकात्यकाम्या॥मालिनी॥६॥तनुर्लग्नंतुहिनमरीचिश्चंद्रः तयोर्लग्नचंद्रयोश्चर
गृहगतयोश्चरराशिस्थितयोः॥आधारेसप्तमी॥अंगनाखेटशुक्रः तस्यदृष्टोसंश्चररा शि
स्थेलग्नचंद्रौशुक्रेणदृष्टाविसर्थः॥चेद्यायिनोग्रहाः अविहितबलिताःसंतोबलिनःस्युःन
दृक्कुमार्थाःकोनयुग्मंभर्तृदुर्यंस्यात्॥एतदुक्तंभवति॥जातकेप्रश्नादिषुजीवबुधावित्यादि
नादिग्बध्यर्थमासलग्नंप्रश्नाद्यंभवति॥चतुर्थमुदीच्यांसप्तमंप्रतीच्यांदशमंदक्षिणइतिच
शिक्षाशास्त्रोक्तमध्यवर्तिषुचतुरस्रसुविदिक्षुभवंति॥कोणगतादिग्विदिग्मुच्यते॥तस्मात्र
प्राच्यांविदिक्कुसादिगेवप्राच्यादिका॥तस्यांस्थितायायिनोग्रहाःलग्नेनतुर्थसप्तमदशमेन

स्वर्थः॥यातुशीलंयेषांतेयायिग्रहः॥स्थातुशीलंयेषांतेस्थायिनः॥तएवबोराःकुभयविलक्षणआत्मं
हाः॥तेवराहएवोक्ताः॥रविशत्रुंहोमध्येपोरःपूर्वेपरेस्थिताःयायी॥पोरबुधगुरुविज्ञानिसंज्ञी
तांश्चराशत्रुंदः॥केतुकुजराहुशुक्रायायिनइति॥अथयोगःस्त्रीजनकेनस्पष्टमुक्तः॥लग्नंइन्दुश्चरा
शेंदुस्थायायिनोयदाबलिनः॥योषितंग्रहसंदृष्टापतिंद्वयगछतेनारी॥अथद्वितीयंयोगमाह
॥युग्मइंदाविति॥युग्मेसमराशौस्थितेइंदौचंद्रअशुभदृग्पापदृष्टिमुपेतप्राप्तेपापग्रहदृष्टे
इत्यर्थः॥तदाकश्चकाअन्यकाभ्यास्यात्॥काम्यतेतत्काम्यंअन्यस्यकाम्यंयस्याःसातथा॥प
रपुरुषकांक्षिणीत्यर्थः॥तथाचस्त्रीजनकः॥क्रूरग्रहसंदृष्टेसमर्क्षगेराशिनिधनजंतिपतिंभर्तृं॥
स्त्रीणामन्यगतेसौम्येदृष्टेशुभेभवतीति॥अथग्रहविशेषेण॥बलवन्नातूत्कटांतराएवाह॥
नरःप्रियोनीरजलोचनानांनरग्रहैरुत्कटकांतिवीर्यैः॥नारीनृणांचित्तहरास्वभोगेनारीनभो
गैर्वधिरालिमिश्रा॥७॥उपजातिका॥नरग्रहैःपुरुषग्रहैःउत्कटकांतिवीर्यैःकांतिश्चवीर्यं
चउत्कटेकांतिवीर्येयेषांतेतथा॥अतिशायिनब्रह्मादीरतिबलैरित्यर्थः॥तदानीरजलोचना
नांना॥स्त्रीणांनरोभर्त्रीप्रियःस्यात्॥नारीनभोगैःस्त्रीग्रहैर्बधिरालिभिःबलेनगलंतेशो
भंतेतेबधिरालिनःतदानारीनृणांचित्तहराप्रियास्यात्॥नरैः॥स्वभोगैःनिजभोगबोधालैः

पुरुषस्यनारीप्रियास्यादित्यर्थः॥बुधसूर्यसुतौनपुंसकारब्योराशिशुक्रौयुवतीनराश्चरो
षाइतिस्त्रिग्रहद्वितेसतिनारीनभोगैरितिबहुलंकथमुपपद्यतेउच्यते॥शौनकीयेऽपिशो
षितंग्रहैरितिबहुलमस्तिभतोभस्यपुज्यार्थत्वादिमाद्विगतिश्चियाकिंच॥पतिरस्यप
तिर्विरोचनः॥श्वसुरस्तुमादामदग्रहः॥अबलाबलिनोदृशःसमीसुदृशांनेषुशुभंशु
भेकेमातृ॥८॥वैतात्तीयेसुदृग्यासीतासुदृशः॥तासांस्त्रीणांपतिरस्यपतिःससमाधि
राःस्यात्विरोचनःसुर्यःश्वसुरःमदग्रहःशुक्रःश्वसुरस्यप्रमदास्त्रीश्वसूरित्यर्थः॥अमि
पत्यादयःखचराःअबलानिबलाःबलिनःसवज्राक्रमासुदृशःस्त्रीणांनेषुपत्यादिषुशुक्र
शुभंदिशतिदिदृक्षति॥॥किंच॥शशिसुतयुतावनीसुतैरशनीचास्तगतैःकरग्रहे॥अ
पिवन्धिपेनतप्यतेविरपत्यानियतंनितंबिनी॥थावैतालिये॥करग्रहेसमयेशशिसु
तयुतावनीसुतैःचदृशानिकोमैःयथातथावस्थितैरशनीचास्तगतैः॥अरिशत्रुगृहे॥नी
चकिंचगृहेअस्तमस्तमयंतंगतैरपिसमुच्यतेनन्धिपेनापिअशनीचास्तगतैः
एतद्योगेनितंविधिस्त्रीनिरपत्याअसौपसरहितास्त्रिनियतंनिश्चितंतपतेनापुंप्रा
प्नोति॥अत्रसप्तमभवेनेतिबलेसतीनी॥प्रक्षेपकं॥तथाचशौनकः॥लग्नपतौरिपुस्था

DR BHAU DAJI LA

वने त्रीचेत्वारविंशुनारररजनीकरैः॥ बलरहितेच धूनेस्त्रीणांनसंस्पत्यानि॥अथस्याच्चवि
रुधंकिंचिल्लोकःक्षितदुपहसति॥कवेस्तीयस्वशुभायरेखालग्नेनसस्थानभनक्तिसोमः॥
तेद्ध्येसोरिरपीतिरीतिर्जनेषुजागर्तितरांकुतस्या॥१०॥उपजातिका॥तृतीयस्थकवेःशुक्रस्यरे
खाश्रुभायभवेत्॥लग्नस्यग्रहबलावलोकनेगणनाथेप्रतिग्रहमेकेकारेखाक्रियतइतिज्योति
र्विदांसंप्रदायः॥तत्रतृतीयःशुक्रःशुभः इतिकृत्वारेखाक्रियतइत्येकारीतिः॥नभस्थेदृग्राम
स्थेसोमःलग्नेनभनक्तिलग्नभंगकर्तानिभवदित्यन्यारीतिः॥तद्ध्येयद्वादशेसोरिःशनिरपि
लग्नेनभनक्तीतितृतीयारीतिः॥इयंरीतिःषडुतिर्जनेषुकुतस्याजागर्तितरां॥इयंरीतिःसर्व
थात्रिभूलाः॥लोकेषुकस्माद्गुरोर्जाताअतिशयेनिधास्तीति॥अस्यानकुत्रापिभूलंदृश्यतद्
स्यर्थः॥कुतोजाताकुतस्या॥अतिशयेनजागर्तीतिजागर्तितरां॥आख्याताभरपूः॥आमत्र
तदंतमव्ययं॥अथजामित्रदोषभंगमाह॥उक्षाणाशुरुरिंडुनंदनःशुक्रिजामित्रगपापनाता
पहृत्॥नवपंचमकेंद्रमित्रभवेद्यदिपुष्टदृग्विधुंस्युरान्॥११॥वैतालीयं॥उक्षाणाःशु
क्रःगुरुर्दृष्टस्यहर्तिः॥इंडुनंदनोबुधः॥अयमेकोपिशुक्रिजामित्रगपापतापहृत्स्यात्॥
शुक्रोनःजामित्रंगछतीतितथासाधासौपापंअ॥तस्यतापःअशुभंतंहरतीतितथा॥

चंद्रात्सप्तमपापस्यदोषहर्त्रीभतीत्यर्थः॥कथंभरतः॥नवपंचमेति॥नवपंचमांशूरेणनवपंचमेतेच
केंद्राणिनवपंचमकेंद्रांस्तिस्रोमित्रांचतत्रप्रणाथोऽस्मास्मासौतथा॥नवपंचमकेंद्रगतः
सन्मित्रगृहस्थितइत्यर्थः॥अपिच॥पुष्टदृग्विधुंस्यूत्॥पूर्णदृष्ट्याचंद्रंपश्यतीत्यर्थः॥अत्र
केंद्रंसप्तमंविरहितंज्ञेयं॥अशुभत्वात्॥तथाचोक्तः॥हरिजदिवसचंद्रात्सप्तमक्रूरदोषः
क्षयकृदमरपूज्यःसोमपुत्रःसितोवा॥उदयहिबुकधर्मव्योमपुत्रालयस्थोयदिचसकलदृ
ष्ट्यालोकयेन्नोनरस्मिमिति॥तत्रपरिपूर्णजामित्रदोषभंगमाह॥हिमरश्मिनवांशकात्
स्वलोथदिखेटःशरसायकांशके॥अयमन्यगणेनहन्यतेनिबिडैरेष्युपसर्गडंबरः॥१२॥
वैतालीयं॥इंदुर्हिमरश्मिनवांशकात्केंद्रस्थितनवांशकात्नूस्वलखेटःशरसायकांशकेपं
चमांशात्नमेननमांशोभवति॥अयमुपसर्गडंबरःदोषडंबरःनिबिडैःपरिपूर्णैरित्यर्थ
गणैर्हन्यतेचेज्जामित्रगोऽपिपापोयदिषडंतरेभवतितदायंदोषःकेनापिगणेनभंजतेने
त्यर्थः॥अथयोगानांविचारंप्रस्तुतमस्तीत्याह॥मोघाःक्षितिदग्धबीजजयोगाःकेऽ
पिकेचनशरीरधारिणः॥दृढमूढफलोदयाश्चरेषणकीर्णकुनाशराशिवत्॥१३॥वैतालीयं॥के
पिकेचनशरीरधारिणःसंपूर्णाःप्रसक्षाइवदृश्यमानायोगानिःफलाःस्युःकिंवत्॥क्षितिव

दग्धबीजवत्॥शिखिनाग्निनादग्धंयद्बीजंतदूतं॥यथाग्निदग्धंबीजंत्रसद्संपूर्णावयवम
पिकार्यक्षमंनभवेत्तद्वत्केचिद्योगाःसंपूर्णाःप्रत्यक्षंदृश्यमानाअपिमोघाःस्युरित्यर्थः॥निर्बळा
नांग्रहाणांसंपूर्णाअपियोगामोघाःस्युरितिभावः॥परेकेचनयोगादृढारूढफळोदयाःसंति॥दृ
ढारूढःआळुत्रःफळोदयःफळप्राप्तिर्येषांतेतथा॥किंवत्॥पर्णाकीर्णहुताशवत्॥ऊर्णेरिवाकी
र्णःआळुत्रश्चासौहुताशश्चाग्निस्तद्वत्॥यथापर्णाकीर्णोवह्निःप्रत्यक्षमदृश्यमानोऽपिस्वका
र्यक्षमोभवेत्तथाकेचनयोगाअपीत्यर्थः॥बळानांग्रहाणांयोगेपरिपूर्णफळःस्यादित्यर्थः॥
एवंविधविचारवतोदैवज्ञस्यजगत्सुपूज्यत्वंस्यादित्याह॥=अत्र=॥इतियःप्रतिकूळकारकग्रहु
भावांशनिवेक्षदृष्टिभिः॥तच्चादिफळेषुदत्तदृक्सुप्रज्ञोसवतंसतांसतां॥१४॥वैतालीयं॥सदै
वविस्तांविदुषांअवतंसतांप्राप्नोति॥अवतंसःकर्णपूरःतस्यभावस्तथा॥सतामपिवंद्यःकि
मुतान्येषामिति॥सकःयइत्युक्तप्रकारेणप्रतिकूळकारकग्रहभावांशनिवेक्षदृष्टिभिःकृत्वा
तच्चादिफळेषुदत्तदृक्॥प्रतिकूळंदुष्टंकुवंतीतिप्रतिकूळकारकाःतेचतेग्रहाश्चभावाश्चभंशाश्च
प्रतिकूळकारकग्रहभावांशाकेतेनिवेक्षःस्थानंयस्यसतच्चदृश्यस्तानिस्तत्वादीनांफळेषुनि
क्षेपुदत्तादृग्यत्नसतथा॥दुष्टकारकायेग्रहाभावाश्चअंशाश्चतेषांयानिस्थानानितेषुदृष्टिंद

त्वातच्चादिफळेषुचदृष्टिंदत्वातद्बळाबळंविचार्ययदादृष्टंतदाऽन्यथानस्यादितिकृत्वासदैवविस्तां
वंद्यःस्यादित्यर्थः॥ ॥छ॥ ॥इतिश्रीसकळागमाचार्यवर्यश्रीकेशवसांबसूरिविर
चितायांश्रीबृहद्दैवज्ञवल्लभटीकायांविवाहदीपिकायांग्रहयोगादिबळाबळाध्यायः॥ ॥छ॥ ॥छ॥
अथस्त्रीपुंसयोःसामुद्रिकलक्षणापूर्वकोमिश्राध्यायआरभ्यते॥तत्रादौतत्कारणमाह॥तस्मि
न्यसामुद्रिकलक्षणानिवरःकुमारीवृणुयान्निमित्तैः॥एवंकुमारीवृणुयान्निमित्तैवरमप्युद्वो
ढघेकधारंनिरधारयिधीरैः॥१॥उपजातिका॥वरःकुमारीवृणुयात्॥कैःनिमित्तैःयल्लिंगंगळेसू के+
स्थानंप्रत्यक्षमाप्तैः॥किंकृत्वा॥सामुद्रिकलक्षणानिउक्तरूपप्रकटीकृत्य॥समुद्रेणप्रणीतानिले
क्षणानिसामुद्रिकाणि॥स्त्रीपुंसयोःशुभाशुभलक्षणानांमुख्यप्रवर्तकःसमुद्रएव॥यथाभा
करेणस्वपाणिनिः॥छंदसश्चपिंगलः॥अतस्तानिमैसामुद्रिकलक्षणानीत्युक्तं॥कुमार्याःसामु
द्रिकलक्षणैःशुभाशुभकाळेनिमित्तादिभिश्चशुभंज्ञात्वातांवरयेदित्यर्थः॥एवंवरमपिकुमारीवरयेत्॥
वरस्यापिशुभंज्ञात्वातंवरंकुमारीवृणुयादित्यर्थः॥एवंचेन्नर्हिप्राक्तनफळसंदर्शनेकिमित्याशंका
यामाह॥उदर्कइति॥हियस्मात्कारणादुदर्कःउत्तरकाळिनंशुभंधीरैर्गर्गादिभिरेवमथैकत्रकार्यं
अरंनिश्चितंननिरधारिननिर्धारणं॥भाविफळमनेनेवप्रकारेणज्ञेयमितिननिश्चितमितिभावः॥

तदेवसप्रपंचमाह॥स्वप्नोनिमित्तंशाकुनाःस्वकर्मशरीरमागंतुकमद्भुतानि॥दोषानिचारग्रहचारका
ळकाष्ठानिचैवंविधःफळाधा॥२॥इंद्रवज्रा॥एवंस्वप्नादिकःफळाधाफळमार्गःविविधोऽनेकधा
प्रकारोऽस्ति॥स्वप्ननिद्राविशेषज्ञंज्ञानं॥ननुस्यान्निद्रायनंस्वापःस्वप्नःसंवेद्यइत्यपीत्यनि
नेनिद्रास्वप्नयोरभेदोऽस्ति॥सत्यं॥तथाप्यंतरविशेषाद्भेदोऽस्तीवचनग्रहनवत्॥तथाहि॥जाग्र
तिस्वप्नसुषुप्तितुरीयाइत्यवस्थाचतुष्टयंयोगशास्त्रेप्रसिद्धं॥तत्रजागृतिःप्रसिद्धा॥मनसानि
ंद्रियप्रदेशावस्थाननिद्रा॥साद्विविधा॥स्वप्नःसुषुप्तिरिति॥यत्रदुष्टांतःकरणंज्ञानमस्ति सास्व
प्नइत्युच्यते॥यत्रतुएतन्नास्तिसासुषुप्तिः॥एतत्त्रितयंसर्वजनानुभवसिद्धं॥निसृष्टोपिविलक्षणा
स्तुरीया॥साचयोगिनामेव॥स्वप्नावस्थायांतद्भवंज्ञानमपिस्वप्नद्रष्टृनोपचर्यते॥यथाश्रीभाग
वते॥अस्वप्ननिद्रानुगायंतीति॥नैषधकाव्येऽपि॥निद्राविशिस्वप्नगतंददर्शतमिति॥अतस्त
लक्षणमाहुर्नैष्ठायकाः॥योगजधर्मानुगृहीतस्यमनसोनिरिंद्रियप्रदेशावस्थाननिद्रा॥त
त्रदृष्टांतः॥करणंजंज्ञानंस्वप्नइति॥एवमत्रस्वप्नद्रष्टृनिद्राविशेषज्ञंज्ञानमुच्यते॥तस्मात्सुखा
देशः॥अयमेकोमार्गः॥निमित्तानिशकुनदुर्वचनादीनि॥शाकुनाःघूर्णकुंभादयः॥स्वकर्मनिजप्राची
नकर्मविपाकः॥शरीरंसामुद्रिकलक्षणादि॥आगंतुकंभरविष्यत्स्वप्नंजातकादि॥अद्भुतानि

उत्पाताःदिव्यांतरिक्षभौमादयः॥दोषावातपित्तादयः॥स्वाभाविकाःशरीरस्थाः॥तेषामविचारः प्र
चारःस्वरविधानादि॥ग्रहचारागोचरकर्मार्गस्तोदयादयः॥कालःसंवत्सरमासलग्नादिः॥
काम्यंकांक्षितं॥ऐहिकंपुरुषवेष्टादि॥तथाचयोगकरः॥तिथिकरणाक्षीनिशाकरविलग्नपरि
कल्पनामयंमार्गः॥पाणिग्रहेपुफळंवदंतिपवनावसिष्ठभ्रु॥ग्रहगोचरमभवंजातकविहितंच
देवळःप्राह॥शाकुनकुलज्ञाःशकुनैर्निमित्तकुशलानिमित्तेत्यादि॥कर्मसमुद्भवंचान्ये
कुशलदैवज्ञास्त्रीस्वभावमपरे॥इच्छंत्यन्येनयःकालविशेषाद्विशेषफलमाहुरिति॥एवंस्वप्ना
दिफलमार्गोनानाविधोऽस्ति॥अतोवरवध्वोःसामुद्रिकलक्षणाश्चस्वरादिकमप्यस्माभि
रत्रसूत्रइतिभावः॥तथाचाहुः॥जातकनिमित्तसमुद्भवशुभलक्षणलक्षितांकुलोद्भूतां॥वरय
सुतसोदर्याथ्यवीयसींकन्यकामिष्टामितिभ्रातृव्यवीयसीसूनोवयसाप्रमाणेनभ्रु॥॥एवंप्र
ळमार्गेछिन्नेषुसप्तसुतत्समाधानमाह॥प्राक्कर्मबीजंमलिनालनोर्वीसंस्कारवक्त्रमिवौष
धानं॥रोषायपोषायचनस्यतस्मात्सदासचारवतांनहानिः॥३॥उपजातिका॥एतत्त्रागेव
आरभ्यतेमायं॥पूर्वजन्मनियदुपार्जितंसदसत्कर्मतत्प्राक्कर्मेत्युच्यते॥तदैवदेवंयदेहिकंकर्मन
स्त्रयत्नपौरुषंचोच्यते॥यत्प्राक्कर्मतस्यरोषायक्षयायपोषायपुष्ट्यर्थंचअधुनाविधीयमानं

क्रीयमाणं कर्म भवतीत्यन्वयः ॥ किंचतत् ॥ बीजं सलिलानलोवा संस्कारवत् ॥ सलिलं जलमनलोऽग्नि
रुर्वा भ्रमिः ॥ आसांसंस्कारः तद्वत् ॥ यथासद्बीजंसङ्गिः सलिलादिसंस्कारैः संस्कृतंसदुप्तं ॥ नर्धतेच ॥
अन्यथाक्षीयते ॥ तद्वत्कर्मऐहिकेनसत्प्रयत्नेन नर्धतेऽन्यथाक्षीयतइति ॥ तस्मात्कारणात्सदाचार
वतांश्रुतिस्मृत्यादिषु यद्विहितं नित्यं सदाचारस्तद्वतांपुरुषाणांसदाकदाचिदपिनहानिःस्यात् ॥ अशु
भमपिकर्मफलं सत्प्रयत्नेननिवार्यं नइत्यादिकंप्रपंचितंप्राक् ॥ तस्मात्स्वप्ननिमित्तत्राकुनाद्दसामु
द्रिकलक्षणादयोपिप्रयत्नलक्षणाआवश्यंविलोकनीयाइतिसिद्धं ॥ एतदस्माभिः संप्रदर्शनंग्रथ
ममेवनिरूपितं ॥ अथकेचिन्मन्यंतेवफलंतीतिमन्यमानास्तन्मतंनिरस्यति ॥ फलेद्यदृष्टाकृतमेवत
त्किंतूत्पादुपायेषुपरःप्रयत्नः ॥ श्रुतिस्मृतिश्चपिनृणांनिषेधविध्यात्मकेकर्मणिकिंनिषण्णा ॥४॥
वैपरीत्यान्नकिं ॥ आगमंवदाकृतंकर्मयदिप्राक्तनंकर्मवफलेतंनतुपयत्नस्तदाकृषिरपि
ज्यादिषुपायेषुअगमप्रकारेषुपरःप्रयत्नःकिंकथमेषतेषुकृष्यादिषुप्रयत्नःकर्तव्यः ॥ यद्द
श्री
नश्यंभावितद्भवत्येवेतिकृत्वासर्वजनेषुनप्रवर्तितव्यं ॥ सर्वत्रप्रवर्तने ॥ अतःप्रत्यक्षविरुद्धंतदित्यर्थः ॥ ८३ ॥
नकेवलंप्रत्यक्षविरुद्धं ॥ किंच ॥ आगमविरुद्धमपीत्याह ॥ श्रुतिरिति ॥ नृणांविध्यात्मकेकर्मणिनिषे
धरूपेकर्मणिश्रुतिस्मृतिश्चकिंनिषण्णा ॥ कथंप्रवृत्ता ॥ आत्मानंसततंगोपायेत्यादिश्रुतिः ॥ नहृक्षमा

रोहेन्नकूपमवेक्षेतनबाहुभ्यांनदीतरेन्नसंन्यायमभ्यवहरेत्यादि ॥ आश्वलायनादिकल्पानां ॥ श्री
कामःपुष्टिकामोवाग्रहयज्ञंसमारुरुक्षेदित्यादिज्ञवल्क्यादिस्मृतीनांचिकित्साशास्त्रस्यचनैष्यर्थ्य
प्रसंगःस्यादित्यर्थः ॥ एतदपिसप्रपंचंग्रथममेवनिरूपितं ॥ अतोयदुक्तंतत्सम्यक् ॥ अथप्रकृतं ॥ तत्र
तावत्स्वस्यारिष्टमाह श्लोकसप्तकेन ॥ छायांविधोर्नक्रवसृक्षमालामालोकयेद्धोनचमानुचक्रं ॥
रवंडुपदंयस्यचकर्दमादौकफश्रुतोमज्जतिचांबुचुंबौ ॥ ५ ॥ उपजातिका ॥ अमुंवरंनृणीरनुद्दसु
नरेणसर्वत्रसंबंधः ॥ अमुकफः ॥ विधोश्छायांकलंकंनालोकयेत् ॥ नचध्रुवं ॥ नक्षत्रऋक्षमालांध्रु
वंदृढं ॥ नचभानुचक्रमालोकयेत् ॥ भानुसंज्ञानांरविराशीनांसप्तविंशतिसंख्याकंमंडलं ॥ यस्यचपदंकर्द
मादौरवंडुंभवेत् ॥ कर्दमःश्लिष्टप्रभृतिषुक्षिप्तपदस्यप्रतिरूपंरवंडुंभवतीत्यर्थः ॥ यस्यकफःश्लेष्मा उ
द्रेकेनिश्चूनश्चुतःनिष्ठूतःसन्नंबुचुंबीमज्जति ॥ अंबुचुंबतीसंबुचुंबीजलमाकृष्यचुंबतीत्यर्थः ॥ उरःपुरः
पुष्पतियस्यचाङ्गनमतितिस्रोंगुलंयश्चनत्रके ॥ स्नानतस्मूर्धन्यपिधूमवल्लीलीयतेरिक्तमुखःरवंगो
वा ॥ ६ ॥ यस्यचउरउच्छ्वासेउद्रेकंचंदनादिनाईकृत्रंसतऋजयस्माछरीरस्नानात्पुरःपूर्वंशुष्यति ॥
शुष्कंभवति ॥ यस्यचवक्त्रंमुखेकनिष्ठांगुष्ठौविहायमध्यमास्तिस्रोंगुलयःपरस्परकुक्षिसंलग्नाः
नभानिनसमाविशंति ॥ आपेर्वार्थौ ॥ यस्यवाउद्रेकेस्नानस्यमूर्धनिमस्तकेधूमवल्लीधूमश्रेणिरास्या

यस्यवामूर्ध्वनिष्फलथाग्रहिनासिकमुखःरिक्तचंचुःखगःपक्षीनिलीयतेनिर्विशति॥नाकर्णीकर्णःश्रृणुयाच्चघोषंनोनासुश्रुक्कोऽपिश्रृणोतिनधने॥निश्रीरकस्मात्सुनासांचसुश्रीःकृशःस्थूलीयानपियोऽप्यकस्मात्॥७॥यश्चांगुल्यादिनाग्राकर्णिकर्णःअदृतकर्णरिंधःसन्अंतर्नतिनंस्वाभाविकंघोषंनश्रृणुयात्॥नोवासुश्रुक्कोऽपिअतिशयितंश्रुक्कोऽपिश्रृणोतिनश्रिनधने॥अतिश्रुक्कःसन्नपितत्रिंनजानातीत्यर्थः॥यश्चसुश्रीरप्यकस्मान्निश्रीर्भवति॥अपिवार्थे॥निर्गतश्रीर्नोभाग्यस्यासौतथा॥यश्चकृशोऽकस्मात्स्थूलीयान्भवति॥यश्चस्थूलीयानप्यकस्मात्कृशोभवति॥अतिशयितस्थूलःस्थूलीयान्॥नु॥स्थूलदूरेतिस्थाद्देशः॥अतीवतुच्छंबहुनाग्रहेतोरतीतसाम्यःसदसत्प्रवृत्तौ॥अप्यंगुलिक्रांतविलोचनांतोनमेचकंचंचुकमीक्षयतेयः॥८॥अग्राहेतोःज्वरादिहेतुंविनाअतीवअतिशयितुंतुच्छमल्पंअतिभक्षयति॥यश्चअसकादिसाध्यादिहेतुंविनाअतीवबहुपरिक्षिपति॥यश्चसदसत्प्रवृत्तोविषयेअतीतसाम्यः॥सच्चअसच्चसदसतीतत्रप्रवृत्तिःतस्यांअतीतंसकंसाम्यंस्वाभाविकंयेनसतथा॥यःस्वाभावेनसत्प्रवृत्तिःसन्सचेदसत्प्रवृत्तिःयश्चासत्प्रवृत्तिःसन्सत्प्रवृत्तिरित्यर्थः॥अपिवार्थे॥योवाअंगुलिक्रांतविलोचनांतःसन्चंचुकंमेचकंनेक्षते॥अंगुलीभिः

क्रांतौआक्रमितौवाकूलोचनांतौनेत्रप्रांतौयेनसतथा॥मेचकवर्णोमयूरपत्रकंरवद्योतानुरवद्योतमानंस्वानुभवसिद्धं॥मध्येललाटंमणिबंधधारीनाल्पिकांपश्यतियःकलावी॥अहेतुकंयःभ्रूबंधिगात्रंःसर्वत्रेमींतिनमूर्धजाश्च॥९॥मध्येललाटस्यतिलस्तंमध्येललाटं॥परिमध्येषष्ठ्यावेसमर्थीभावः॥मणिबंधंधारयतीतिमणिबंध्यधारी॥योललाटमध्येमणिबंधंधृत्वाअल्पिकांकृष्णांकलांनपश्यति॥तलहृस्वाधस्थसंधिर्मणिबंधः॥तद्धारुस्नभागःकलावी॥स्त्रीणांकरभूषणास्थानं॥यश्चअहेतुकंअकारणंभ्रूबंधिगात्रः॥भ्रूबस्यगंधबंधेइवगंधोयेषांतानिभ्रूबंधीनितानिगात्राणियस्यासौतथा॥योनासीमंतिनमूर्धजः॥सीमंताःसंजातायेषांतेसीमंतिताःतेमूर्धजाःकेशायस्यासौतथा॥सीमंतःस्त्रीणांललाटोर्ध्वकेशविन्यासःअसिद्धः॥अपिक्षरद्रोमनखःशरीरात्सद्यःस्रवद्भामविलोचनोवा॥निरीक्षतेसत्तमसानुषंगाविस्रस्तनासानयनस्रुतिर्वा॥१०॥अपिवार्थे॥योवाशरीरात्क्षरद्रोमनखःक्षरंतिगलंतिरोमाणिनखानिचयस्यासौतथा॥योवाअमानुषंमानुषाद्भंसत्रंसत्रोणिंपित्राचादिकंनिरीक्षते॥योवानिस्रस्तनासानयनस्रुतिः॥नासानासिकानयनेनेत्रेअक्षिणीकर्णौ॥विस्रस्ताःशिथिलीभूतानासानयनस्रुतयोयस्यासौतथा॥आक्षिप्यमाणोदृष्टिर्

क्षिप्यास्यां जागर्त्तियानेऽधिकृतः स्वरादौ॥ नोदृष्टदृष्टांतमसुकुमार्यनार्याः प्रदानायवरंवृणी
रन्॥१२॥ इंद्रवज्रा॥ योवा स्वप्नमध्येस्वरादौगदीयानेऽधिकृतः स आरूढोदक्षिणस्यांदि
शि आक्षिप्यमाणःप्रेर्यमाणः सन्जागर्त्तिप्रबुध्यते॥असुकुमार्यआर्याज्ञातारः कुमार्यःप्रदाना
यनवृणीरन्॥ तत्रकारणमाह॥ नोदृष्टेति॥ नदृष्टः अतिसमीपःदृष्टांतः अलंयोयस्यासो
तथा॥अतिशयेनअंतिकः नदृष्टः॥अंतिकआछ्योनदसार्थेतिनदादेशः॥दृष्टांतः प्रत्य
योस्ययइत्यमरः॥आसन्नमृदुमसुकुमारंनवंस्युरित्यर्थः॥अथदर्शनविधौकुमारीवरोऽपि॥
अथछायालक्षणेनारीरिष्टमाह॥छायांनिरीक्ष्यक्षणमंतरिक्षंपश्येत्सनयोनिश्चलनेत्रपातः॥
शुभ्राभ्रसच्छायमिहस्वशरीरं=कायंपश्येत्सनयोद्वितीयविकारः॥१३॥ इंद्रवज्रा॥निश्चलः
स्थिरःनेत्रयोःपातोयस्यासोतथा॥यःनिश्चलदृष्टिःसन्क्षणंस्वस्मछायांनिरीक्ष्यततःक्षण
मंतरिक्षंपश्येत्तथास्वकायंस्वदेहंशुभ्राभ्रसच्छायंनपश्येत्॥सनयेन्नाशंप्राप्नोति॥
शुभ्राभ्राणिशुभ्रमेघाःतैःसमानाछायस्यासोतथा॥समानसादेशः॥इहाभिन्नस्वका
यविकृतौदृष्टायांससोविकारःस्यात्॥यस्यांगस्यविकारोदृष्टस्तदंगस्यतथाविकारःस्यादि
त्यर्थः॥अथश्लोकत्रयेणपुरुषलक्षणमाह॥प्रदक्षिणावर्त्तशरीररोमादृढस्नायुःफेनिलश्च

पातः॥नासत्यपालिर्मनसागभीरोचिरोन्नतारंभरुचिर्यशस्वी॥नृपजातिका॥प्रदक्षिणा
सव्यमावर्त्तोपरिभ्रमोयेषांतानिप्रदक्षिणावर्त्तानितानिशरीररोमाणियस्यासोतथा॥दृढ
स्नायुरनद्धस्नायुः॥छायस्यासोतथा॥फेनाअस्तियस्मिन्नसोफेनिलः॥फेनादिलचेतिइलच्॥
फेनिलःमृत्रंपातोयस्यासोतथा॥नत्रसत्पःलेषुभेनिपालिर्यस्यासोतथा॥नासिकाट्टिलोपश्च
नलोपः॥फालिर्गुल्फोत्कोरधःप्रदेशः॥तत्कुंथीचुटिकेगुल्फोपुमान्पालिरधस्तयोःस्थि
तिधानात्॥मनसागभीरोगंभीरः॥प्रकृत्यादिभ्यश्चेतितृतीया॥निम्नंगंभीरंगंभीरमित्यर्थः॥
थिरानिःसंधुरोउन्नतानवर्धमानाआरंभेषुकार्येषुरुचिःप्रीतिर्यस्यासोतथा॥प्रशस्तंय
शोऽस्यास्यासोयशस्वी॥प्रशंसायांमत्वर्थेनिः॥स्निग्धेक्षणस्तुरुःखदंतकेशोभुवासुवासाः
परिवीतश्चेष्टः॥नस्त्रीमुखोनिःप्रभृतीनमूर्त्तिर्निगतिकृत्स्नेक्षणतारकोवा॥१४॥आर्यावि
धौ॥ईक्षणेनेत्रेस्निग्धाःसस्नेहाःईक्षणोवत्सकुचनरश्चदंताश्चरुशाश्रमस्यासोतथा॥ओ
ष्ठसवर्णः॥स्त्रियामुखमिवमुखंयस्यासोस्त्रीमुखः॥नितरांप्रभायस्याःसानिप्रभाशो
भासूर्त्तिर्यस्यासोतथा॥अतिकृत्स्नेक्षणतारकाःस्त्रियाःसानेनपश्यतीतिईक्षणयोर्नेत्रयोस्तार
केईक्षणतारकेअतिकृत्स्नेईक्षणतारकेयस्यासोतथा॥श्रोचिस्चारीशुचिरिंगितज्ञोनिशा

BHARAT DAU

ह्रस्वानूनबाहुवक्षाः ॥सर्वोऽपिसत्वाकृतिमान्कुलीनःकन्याप्रदानायनरोनरोगी ॥१५॥ इ
पजातिका ॥उचितंयोग्यंतत्स्वभावःऔचित्यंतच्चरतिआचरतीतितथाशुचिरनिंदिताचरः॥
इंगितंपुरस्यचेष्टितंतज्जानातीतितथा ॥विशालविस्तीर्णेहस्तौचआननंचबाहूचवक्षश्च
यस्यासौतथा ॥सुरवलक्षणान्याह ॥सर्वोऽपीति ॥सर्वोऽपिपुरुषैःसर्वलक्षणैःसंपन्नोऽपि
रःसत्वाकृतिमान्कुलीनःनरोगीस्यात् ॥सत्त्वस्यआकृतिर्यस्यासौतथा ॥सात्विकयाकृतिमि
सर्थः ॥कुलीनोविख्यातसत्कुलप्रसूतः ॥नरोगीअव्याधितः ॥किमर्थंकन्याप्रदानाय॥
एवंलक्षणासुस्त्रीवधूलक्षणान्याह ॥[illegible]रेखामोन्नतास्थीपृथुकरचरणाहृद्यैरुक्षा
ग्रकेशानिःस्नोरोमशांगीक्रूराकुटिलचलक्रूरसछद्मदृष्टिः ॥नामावनीविशालेस्व
तविकटनटद्भूललाटास्मृशंतीनोर्वीमिसागुल्फ्यामानियतबहुमुग्गृहिनीदृहिनीरुमू
॥१६॥ स्त्रग्धरा ॥श्मश्रुनिःस्त्रियामोश्मश्रुरूपामोतोऽन्नतोऽच्चोऽग्रोष्ठोयस्याःसातथा
कात्रिकोदरेतिडीप् ॥स्नुचेभनिःस्नोचं ॥निःस्नोनासाहीना ॥रोमाणिसंतियेषुतानिरोमश
×करौचचरणौचकरचरणंपृथुकरचरणंयस्याःसातथा ॥पृथुहस्तापृथुचरणाचेति ॥रूक्ष×
×एषस्निग्धानिअग्राणियेषांतेरूक्षाग्राःकेशायस्याःसातथा ॥अत्रडीग्रोविकल्पान्नडीप् ॥×

नि ॥रोमादेःस्वार्थइनिमत्वर्थइनिः ॥रोमशानिअंगानियस्याःसातथा ॥अंगगात्रेतिडीप् ॥क्रूरालघुःकुटिलावक्राचलतीअस्थिराक्रूराउग्रासछद्मासकपटा ॥उपधिसछद्मकैतवदंभमरः ॥ए
वंविधादृष्टिर्यस्याःसाक्रूराकुटिलचलक्रूरसछद्मदृष्टिः ॥नामाअग्रदक्षिणाआवर्तरोमा
वर्त्ताःयस्याःसातथा ॥विकटेविसदृशौनटतेःनसनःतेविकटनटीतेषुबोयस्मिन्नाद्विकटनट
द्भू ॥विशालेविस्तीर्णेउन्नतमुच्चैर्विकटनटद्भूललाटंयस्याःसातथा ॥बहूच्चसान्नडीप् ॥विशाले
औतललाटाविकटनटद्भूअत्रेसर्थः ॥अंसाभुजीष्यांकनिष्ठिकोपकनिष्ठिकाभ्यांनवपृथूमीन
स्मृशंतीति ॥अर्थाच्चरणस्य ॥चरणागतकनिष्ठिकोपकनिष्ठिकेक्ष्मांनस्मृशतइत्यर्थः ॥अनि
यतमसंरब्धंबहुभूरिभुनक्तीतिअनियतबहुभुक् ॥एवंविधागृहिनीगृहणीदृहिनीरुमू
स्यात् ॥दृहोऽस्तियस्याःसादृहिनी ॥स्त्रीरूरुडाचोपतापयतिमरः ॥सास्त्रीमूर्त्तिमान्रोगए
वेसर्थः ॥यास्फिग्ललाटोदरलैर्विनीसास्यात्कांतकांतानुजातातहंत्री ॥निंतंविनाल्पनि
तंबणुत्थादुधासतिंदीर्घगलाकुलघ्री ॥७॥उपजातिका ॥यास्फिग्ललाटोदरलैर्विनीसाऋ
मेणकांतकांतानुजातातहंत्रीस्यात् ॥स्त्रियांस्फिजौकुटिप्रोक्तावितिमरः ॥स्फिजौचललाटंच
उदरंचतैर्लवनेसातथा ॥दीर्घास्फिग्दीर्घललाटादीर्घोदरीसर्थः ॥कांतअकांतानुजातोच

ततथा॥ कांतोभर्ता॥ कांता कुजोपर्तृकनीयान्॥ कांततातःश्वशुरः तेन क्रांत्रमेणानुजनीति॥ या स्वल्पनितंबकुक्षासापतिंहंति॥ विरोधयति॥ पश्चान्नितंबः स्त्रीकुक्षिस्मरः॥ गुह्यं योनिः स्वल्पनितंबा स्वल्पगुह्येति॥ यादीर्घगळासाकुळघ्नीभर्तृकुळनाशनी॥ निस्वाभिः कुस्वाधम नोपुरंध्रीश्रयेणतत्रापिपृथुः प्रचंडा॥ कपोळकूपाहसितेऽप्यदृश्याकूर्मोदरीदुःखदरीदुरासा॥ १८॥ उपजातिका॥ यास्त्रीधमन्नोशिरयांत्रातिकृस्वाश्रातिकृशाभोपुरंध्रीनिःस्वानिर्धनाभ वति॥ यस्याश्रातिकृशाशिराइत्यर्थः॥ नाडीतुधमनिःशिरेस्मरः॥ दारास्यानुकुटुंबिनीषु रंध्रीस्मरः॥ तत्रतस्यांधमनौयाश्रातिपृथुः साप्रचंडाश्रसुखाभ्यात्॥ यस्याः शिराश्रति स्थूलाइत्यर्थः॥ याहसितेहांस्येसतिकपोळकूपाकपोळयोर्गंडयोः कूपोगर्तोयस्याः सात था॥ साश्रीळादुरासाभवति॥ याकूर्मोदरीकूर्मसदृग्जठरासाढुःखदरीदुरासाभव ति॥ दुःखस्यदरीवदरीदुःखदरीदुःखगृहा॥ दुरासादुष्टस्यभाना॥ उभाभ्यांमध्यतर स्यामितिपू॥ एवंपरंधोः सर्वेश्शरीरलक्षणमुक्त्वाविशिष्टंहस्तचरणगतरेखालक्षणमाहस्त्री॥ रेखाभिरंगुष्ठतलेगतानांपुंस्त्रीप्रजन्मेविपुलाल्पकाभिः॥ अछिन्नाभिन्नाभिरखंड कसप्तकेन॥ रेखाभिरंगुष्ठतलेगतानांपुंस्त्रीप्रजन्मेविपुलाल्पकाभिः॥ अछिन्नाभिन्नाभिरखंड मायुः खंडंतत्रायाभिरमूभिरस्याः॥ इंद्रवज्रा॥ अंगुष्ठतले हस्तांगुष्ठमूलाधःस्थितारेखाभिः

श्री ॥८७॥

स्त्रीजा

सा०

विपुलाल्पि॥ काभिःक्रमेणपुंस्त्रीप्रसूतिर्वाच्या॥ यावंत्योविपुलरेखास्तावंतःपुत्रायावंत्यःकृशास्तावंतः॥ कन्याइत्यर्थः॥ अमूभिरेखाभिःअछिन्नाभिन्नाभिःअछिन्नाभिःअभिन्नाभिश्चअस्याःपुंस्त्रीप्रस तेरायुरायुष्यंअखंडंपरिपूर्णंवाच्यं॥ तदन्याभिःसाधुपरिशातिताभिःछिन्नाभिन्नाभिःखंडमल्पमायु र्वाच्यंतासुरेखासुयायारेखाअछिन्नाभिन्नातदाप्तंपूर्णायुः॥ याछिन्नाभिन्नातदल्पायुरित्यर्थः॥ एकातिर्यक्कनर्जनीमांतिरेखातर्जन्यंगुष्ठांतराळेतदन्या॥ तेवैस्यातामायुरैश्वर्यरेखेतेस्तो दर्यसुंदरत्वेतयोःस्यात्॥ २॥ शालिनि॥ एकारेखातर्जनीप्रदेशिनीप्रतिनीर्गयातितदन्यारेखा तर्जन्यंगुष्ठयोरंतरालेस्थिताते दैक्रमेणआयुरैश्वर्यरेखेस्यातांप्रथमआयुष्यरेखाद्वितियाऐ श्वरेखेत्यर्थः॥ तयोरेखयोःसौंदर्यसतिअरक्तगंभीरेतिवक्ष्यमाणसौंदर्यसतितयोःआय रैश्वर्यरेखयोःसुंदरत्वंचारक्तत्वंस्यात्॥ ॥ऐश्वर्यरेखासिरवरेणमूलाद्यनक्तियासौपित्त वंशरेखा॥ नीरंध्रबंधाग्रहबंधनायबहूपसिद्धराविवर्धनाय॥ २॥ उपजातिका॥ ॥यारे खामुलाल्पिमुलान्निर्गतासतैश्वर्यरेखायाःशिखरंअग्रंतेनसार्धंनक्तियोगंप्राप्नोति सापित्तवंशरेखाभवतितान्नैशःपित्तवंशोज्ञेयइत्यर्थः॥ रेखानीरंध्रबंधानांछिद्रबंधरे हितानिग्रहबंधनायभवंतिग्रहंगृहीणितस्यावेधनमतिप्रीतिःस्यात्॥ रेखाबहूपसि॥

अतिशयेन बहुलं बहीयसी ॥ वंशविवर्धनाय भवति ॥ त्रियस्थिते इत्यादिना बहुलस्य बहोर्देशः ॥ ॥ कनिष्ठिकाजीवितरेखयोर्मध्ये मिथः कानकञ्चरेखा ॥ कनिष्ठिका ॥ अपसरिया करभेपरस्मिन्भवति सामातुरवर्गरेखाः ॥ २ ॥ उपजातिका ॥ जीवितरेखाअयुष्यरेखा ॥ कनिष्ठिकाजिवितरेखयोर्मध्येकरभवेशास्थितामिथः परस्परंकानकञ्चरेखाःस्युःपुरुषहस्तेतावेत्यस्यभार्यास्त्रीहस्तेतावनेतस्याः कानाइत्यर्थः ॥ मणिबंधकनिष्ठकरस्यकरभोवहिरिसपरः ॥ परेउर्वस्थितेअस्मिनकरभेस्थितासामातुर्वर्गस्यरेखाःअपसरियाइत्येयाःसंमातुरपत्यादिनासामातुरःसोदराःमातुरसंरक्षासंभवपूर्वायाइत्यण् ॥ उच ॥ यथागुष्टतलेपुंश्चाकन्याश्चलक्षितास्तासामायुश्चेतदस्मिन्जीवितरेखायाअधस्थितेकरभेज्ञातरोभगिन्यश्चेतेषामायुश्च ॥ शिव ॥ लक्षितमियमितीभावः ॥ ॥ अनामिकामूलविभूषणयापुण्यस्यरेखानदवासिहेतुः ॥ निःसीमसीमंतिनपंचशारेखाकस्योर्ध्वरेखानकरोतिराज्यं ॥ २ ॥ उपजातिका ॥ अनामिकायामूलेनस्थाविभूषणमिवविभूषणायारेखा ॥ नियतनपुंसकत्वास्त्रीविशेषेणेत्वेपिनस्त्रीवत्व ॥ अनामिकामूलेऊर्ध्वस्थितेत्यर्थः ॥ सारेखापुण्यस्यरेखाकथंभुतातेदत्वासिहेतुः ॥ तस्यपुण्यस्यअवासिःतस्याहेतुः नियतपुंस्कात्वात्स्त्रीविशेषणेपिपुंस्त्वे ॥ तस्यांसत्यांपुण्यप्राप्तिरस्तीत्यर्थः निर्गतासिमायस्यासौनिःसीमः संपूर्णःसीमतोजातोयस्मिन्नितिसीमंतितःपंचस्यांकरेखायस्यासौपंचशारेखःपाणिर्निःसीमःसीमंतितःपंचशारेखायायासानथा ॥ साऊर्ध्वरेखाकस्यराज्यंनकरोतिअपितुसर्वस्यापिराज्यंकरोतित्यर्थइत्यादिनासंवासः ॥ पंचशारेखाशयःपाणिरिसमरःयथोर्ध्वरेखापाद्धिताकृतमिवपाणिनलंभवतिसावश्यंराज्यंचदेत्यर्थः ॥ इत्यादिनासर्वासामपिशुभाभांरेखाणांसाधारण्येनअतिशयितत्वमाहा ॥ ॥ अरुक्षागंभीरमनोहराभिरेखाखिरंतर्मृदुपिंगलाभिः ॥ नचातिबद्धाखिरवायवामेषुपुंस्त्रीफलयोःस्फुटत्वं ॥ २३ ॥ विरितास्वानकी ॥ ॥ अरुक्षाःस्निग्धाःगंभिरानिम्नामनोहरासुंदराःअंतःअभ्यंतरेमधुवसिंगलाःनचअतिनचअतिवध्यःअनतिसंकिर्णाःयतादृशीभिरुक्तारेखाभिःपुंस्त्रीफलयोःस्फुटत्वंशुभफलादिक्यंस्यात् ॥ केषु ॥ अवामवामेषुअंगेषुपुरुषस्यदक्षिणहस्तचरणादिषुस्त्रियांवामेषुइत्यर्थः ॥ ॥ अथकरचरणेवाराज्यचिह्नान्याह ॥ ॥ सरोज्यूपुरश्रीदक्षध्वजगजमितिस्तंभकुलशस्त्रजादर्शचांकुराकुलिशभृंगारगिरिभिः ॥ रथाश्वश्रीसव्यजनयवयूपनष्टतिभिसज्जनसज्जनवेदिय

तिपदपाणिप्रणयिभिः॥२५॥शिरवरिणि॥ ॥सरोजंकमलश्रीवृक्षोबिल्ववृक्षःध्वजःकेतुर्गजोहस्ति॥तिमिर्मत्स्यःसंभवत्यौप्रसिद्धौस्वकुमाल्ये॥अदर्शोमुकुरः॥छत्रमातपत्रं॥अंकुशःप्रसिद्धः॥कुलिशोवज्रं॥२६॥गोरःकरकःगिरिःपर्वतःरथःप्रसिद्धःअश्वतुरंगःश्रीवत्सोविष्णुवक्षसिरोमावदक्षिणावर्तःतदुपचारादक्षिणावर्तमात्रंगृह्यते॥व्यंजनंतालंयवोधान्यविशेषः॥सुषोग्रहस्तोभः॥प्रकृतिभिरित्यादिभिश्चिह्नैःपदपाणिप्रणयिभिःचरणगतैःपाणिगतैर्वानराःपुरुषाःनार्यःस्त्रियःराज्यंदधति॥धारयंति॥एकिलक्षणेऽसौज्यप्राप्तिरित्यर्थः॥अथमुख्यलक्षणान्याह॥अर्चितंवचनमुन्नतमनोनिर्विशेषसुखदंवपुर्दृशां॥अस्तिचेदथपराङ्मुखीमतिर्लक्ष्मणेःकिमपरैर्न्योषितां॥२७॥रथोद्धतं॥ यदिवचनंभाषणंअर्चितंपुजितंस्यात्॥मनोहरमित्यर्थः॥मनःमानसंउन्नतंपशुलोनात्यविषयेमनःप्रवृत्तिरित्यर्थः॥वपुःशरीरंदृशोनेत्राणांनिर्विशेषसुखदंनिर्विशेषंअधिकंसुखंतत्प्रदंतीत्यर्थः॥मतिर्बुद्धिःअथपराङ्मुखीपातकात्परावृत्ता॥तदान्योषितांपुरुषाणांयोषितांवाथरैर्लक्षणैःकिं॥एषुचतुर्षुलक्षणेषुसत्सुअन्येषांशुभलक्षणानांकिमपिनप्रयोजनमित्यभागाद्यनिसामोद्दिकलक्षणानि॥ ॥अथनिमित्तानि॥तत्रवर

णकालेपक्षिचेष्टितमाह॥वरस्यकन्यावरणेवरण्योर्दुर्गावयोदक्षिणचेष्टितश्च॥अदक्षिणचेष्टितमिष्टमाहुस्त्रियोःकुमारीहरणायाद्यचेत्॥२८॥उपजातिः॥वरस्यकन्यावरणसमयेयदावरःकन्यावरितुमिच्छतितस्मिन्काले यःकश्चनपुंलिंगःपक्षीदक्षिणचेष्टितःदक्षिणोगोकूजनकंपनादिभिश्चेष्टितो भवति सवरेण्यःअनिशुभंःस्यात्॥काद्रवदुर्गाद्रवदुर्गाकुलचीटिका॥स्त्रीलिंगपक्षिषुमध्येदुर्गापिदक्षिणचेष्टितासुभेसत्यर्थः॥आर्थादनयोर्यमचेष्टितमशुभमिति॥कुमारीवरंचेद्दूणयात्तस्मिन्काले तयोः पुंलिंगपक्षिदुर्गाअदक्षिणंवामागचेष्टितंशुभमाहुः॥अथशुनश्चेष्टितमाह॥शुनोगतिर्दक्षिणेच्छुकुमारीयत्रकांक्षिणी॥अदक्षिणायत्रतत्रवरेच्छानानुवर्षति॥अनुष्टुप्॥यत्रकुमारिकाक्षिणीवरंवरीतुमिच्छतितत्रशुनःकुक्कुरस्यदक्षिणास्वकीयदक्षिणेभागेगतिरिष्टाशुभा॥यत्रवरःतांकुमारीवुवूर्षतिवरितुमिच्छतितत्रशुनोगतिरदक्षिणास्वस्यवामभागेचेतदाशुभा॥आरोप्याक्षितपूरितेगणपतिंप्रस्थादिपात्रैरमैःसमर्ज्यन्यवचेष्टितेषुवनयःस्त्रियःसकन्यानिशिनिर्यातरजकादिवेश्म

सुकरेऽकस्मात्मभ्यर्चितंयांवाचंशृणुयुस्तदर्थसद्दशीसिद्धिंकिंस्वोपशृण्वंतो॥२०॥सौदूत्वविक्रीडतांअक्षतैस्तंदुलैःपरिपूरितेनपात्रस्थादिपात्रेघटस्थकुडवादिनामानपात्रेसमार्जन्याभवबेष्टितेअक्षादितेगणेनाक्षतिमामारोप्यपक्षिप्यसकन्याःएकयाकुमार्यासहितास्त्रीयुवतयःसुवासिन्यःनिधिरात्रौरजकादिनांवअनरेजकमधकारादीनांवेश्मसुहृद्गृहसमीपेशनैर्निर्यांतु॥किंकृत्वाएवंविधंगंधपुष्पादिभिरर्चितंपूजितंकरेऽक्षतंकलातस्मिनगृहेस्थिताःनामनुज्ञानोयांवाचंयदूचनंशृण्युरकर्णयेयुस्तस्यार्थेअभिप्रायंतेनसद्दशीसिद्धिःचिंतितकार्यस्यसिद्धिर्भवेया॥किंवेतिनिश्चये॥आत्राधिवासनमेत्रादिकंविधानमाह्युक्तंज्ञेयं॥इत्यादिलक्षयेःपरिक्षितांकन्यांवरोवरयेत्कन्यावैपरमित्युक्तं॥तत्रकन्यावरणनक्षत्राण्याहकुलधर्मानितिक्रमवर्णयंश्चाह॥श्रुतित्रिपूर्वाचसुवह्निमित्रविश्वानिलर्क्षेवरणंकुमार्याः॥तत्रावमन्येतनचेत्तयापितुराचरेयुःस्वकुलोक्रमार्यां॥३०॥उपजातिः॥श्रुतिःश्रवणः त्रिपूर्वाःपूर्वात्रयंवसवोधनिष्ठावह्निःकृतिकामित्रंअनुराधाविश्वेउत्तराषाढाअनिलःस्वातीएषुनक्षत्रेषुकुमार्यावरणंस्यात्॥अथकुलधर्मः॥यत्रयाआदृतमाःस्वकुलेकेस्वकुलपरंपरागतानाचरेयुःतत्रेनयापिनावमन्येतनस्यावज्ञामनसापिनकार्याकिंपुनः॥साक्षात्॥अतस्तेकुलधर्माअवश्यं

प्रथ
॥२०॥

कर्तव्याइत्यर्थः॥अत्रापिआगमविरुद्धानकार्याः॥देशाचाराःकुलाचारायेतुविधयोविरोधिनइतिस्मरणात्॥अथवेदिकांनिर्माणंतत्रनिकाळंचाह॥वेदिकानिश्चयेयथातथास्यादियंप्रविशतश्चदक्षिणे॥स्युर्जानाश्रयवोह्निवर्णिकाःषलबत्रिदिवसेषुभाग्नतः॥२१॥स्थाधनानि॥वेदिकांतथाश्चयन्॥यथाइयंवेदिकागृहंप्रविशतःपुरुषस्यदक्षिणेभागेभवति॥लक्षणंभूषणादिकंनारदादिभिरुक्तंज्ञेयं॥इत्यादीनांविवाहकृत्यानामारंभकाळमाह॥स्फुरितिः॥जनाश्रयामंडपः॥मंडपोऽस्त्रीजनाश्रयइत्यमरः॥यवोग्निर्यवाषः॥अंकुरार्पणमित्यर्थः॥तत्संस्कारःशोभनकर्मस्मृत्यादिपूक्तः॥वर्णिकालोकेप्रसिद्धाः॥अथकपिनीषाः॥यद्वावर्णिकारंगवल्यादयः॥एतदुपलक्षणंनदंडनवारकादिग्रहणं॥एतानिअग्रतःपूर्वंनअहतानारभ्यषएवत्रिपुरुषंततोयेनवमकुलस्युः॥पश्चाद्विनदुद्वासनादिकंचज्ञेयं॥केचिन्नवमादिनंशुभमाहुः॥देशाचारोनवस्थः॥अथेंद्राणीपूजादिकमाह॥कन्यकोक्तविधिनसुलोमजाभूजनंसमुचितिःसमाचरेत्॥ध्रुवंतिचाशुभमविघ्नमानामानयज्ञकर्मणांतयेः॥२२॥युवतिभिःसुवासिनीभिःसहितासमुचितिःकन्याउक्तविधिनाशुभंगमथेंद्रपत्नीघटकारकंमृदासुलक्षणावयवामिश्रादिशोक्तविधिनाभूलोमजाइंद्राणीतस्याःपूजनंसमाचरेत्॥अथमातृकादिपूजा॥ध्रुवंतिः॥मातरोहिविधादेवीमानुष्यश्चेति॥तत्रदेवीगौरीपद्मे

सादृश्यो ब्राह्मीमाहेश्वरीसादृश्यश्च ॥ मानुषीमातृमातादृश्यश्चानुविंशतिर्मातृकाः ॥ तासांयज्ञैः पूजादिकं कुलकर्मणीतयः कुलीनाचारवशतोयाः ज्ञातयः कुलदेवताराधनादयः ॥ ताअविघ्नमानताः ॥ तनुविघ्नाः ॥ निर्विघ्ननिष्पादिताः ॥ अश्रुषंघ्रंतिनाशयंतीति ॥ चैः समुच्चये ॥ कुलोमजापूजनंचअश्रुषेहेनी सर्थः ॥ अतः शचीमातृकादिकैः पूजादिकमवश्यंकर्तव्यमितिभावः ॥ ॥ इतिश्रीसकलागमोचार्यवर्यश्रीकेशवसंतसरासूनुगणेशविरचितायांविवाहवृंदावनटीकायांविवाहदीपिकायांमिश्राध्यायः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ अथवधूवरप्रश्नाध्यायआरभ्यते ॥ तत्रादौवधूप्रश्नमाह ॥ कर्मायस्तनुसहजस्मरोमृगांकः स्त्रीपुंससंगमयिता यदिजीवदृष्टः ॥ स्वर्क्षाणिशुक्ररविदृष्टयुतानिकस्मात्लब्ध्वेवधूरहरहःकृपणंनरंतां कीवा ॥ १ ॥ वसंततिलकाः ॥ अस्माकमस्याःकन्यायालाभोभविष्यतिनवेति ॥ प्रश्नकालेयल्लग्नंतस्मात्लग्नाद्यदिकर्मायस्तनुसहजस्मरगः दृश्यभेकादृश्यपंचमतनीयसप्तमगोमृगांकश्चंद्रोजीवेनगुरुणादृष्टस्तदास्त्रीपुंससंगमयितास्यात् ॥ स्त्रीपुंसेतिचनुरादिस्तासाधुः ॥ तयोःसंगमंसमागमंकरोतीतिस्त्रीपुंससंगमयतीति ॥ कन्यालाभंकरोतीत्यर्थः ॥ अयंयोगःकन्यापावरलाभप्रश्नेपि ॥ अविरोधात् ॥ योगांतरमाह ॥ स्वर्क्षाणीति ॥ शुक्रात्त्रिभ्योदृष्टानियुतानिवास्वर्क्षाणिस्वराशयश्चंद्रशुक्रराशयः ॥ रविदृष्टयुताः कन्यालब्ध्येकन्यालाभायभवंति ॥ योगांतरमाह ॥ नधूगृहेति ॥ नधूसंज्ञाःसमराशयोदृष्टकर्कादृश्यस्तेषांगृहाणिदृक्काणावाटंकोनसंज्ञकावालग्नगताः शुक्रराशिदृष्टयुताः कन्यालब्ध्यैभवंति ॥ योगांतरमाह ॥ युग्मर्क्षगोराशिसितोहिपद्मांगनांत्रिस्थानांतरान्नपिशुनोतनुमीक्ष्यमाणो ॥ नारीनसंज्ञमुदितंस्वचरेराःपरेपिस्त्रीणर्क्षगाः विलसदुज्वलनीर्यभाजः ॥ २ ॥ युग्मर्क्षगोसमराशिस्थोराशिसितोहिपद्मांगनांत्रिस्थितोहिपद्मात्सावंगनांत्रयश्चसंज्ञकांशएवतत्रस्थितोतनुलग्नेईक्षमाणोपश्यंतोनरान्नोतदाप्तिंपिशुनोस्तः ॥ तस्याःकन्यायाआप्तिंतस्याःपिशुनोसूचको ॥ कन्यालाभसूचकाविसर्थः ॥ अत्रबाहुनाविनियोगःकार्यविरोधोस्ति ॥ योगांतरमाह ॥ नारीति ॥ उदितंनारीनसंज्ञंस्त्रीनसंज्ञंवृषकर्कीहिबुकोराशिसितावीक्ष्यमाणोतदाप्तिंपिशुनाविसनुवृत्तिः ॥ योगांतरमाह ॥ स्वचरइति ॥ परेपिशुक्रज्ञानेश्वरसनिहिकाअपिस्वचराःस्त्रीर्क्षगाःसमराशिस्थाःस्त्रीणाभिमानिस्त्रीणानि ॥ स्त्रीपुंसाभांनत्रस्वाभिवितनुत्र ॥ विमलसंतःस्निग्धाउज्वलाःप्रकाशमानाःनीर्यभाजःसबलाः ॥ उदितंनारीनसंज्ञंमीक्ष्यमाणाःकन्याप्राप्तिसूचकाइसनुवृत्तिः ॥ अथकन्यावरस्यलग्नेधिप्रश्नमाह ॥ एवंनरानरदृक्काणनसंज्ञादृग्भःपुंस्वचरेरपनमतिनिनंदिनीनो ॥ यल्लिंगिबालकपशुभ्रष्टनीतिंस्यात्स्वभ्रक्षएतदुनदृष्टेवधूवरस्य ॥ ३ ॥ एवमनेनस्वर्क्षाणिशुक्रराशिदृसादिनाधिनानरःपुरुषानितंविनीनो

स्त्रीपाशुपत्यमतिसभागछेदिति॥लक्ष्याभवंतीतियावत्॥कैः॥नरनवांशदृक्काणदृग्भिः॥पुंस्वनरैःनरानि
षमराशयोमेषमिथुनादयस्तेचनेदृक्काणानवांशाश्चनरदृक्काणानवांशइति॥नान्यत्रयेनीतितेनरदृक्का
णानवांशदृग्भिः तैःपुंस्वनरैः पुरुषग्रहैरविभौमगुरुभिः॥एतदुक्तंभवति॥स्त्रीग्रहोकिलग्नाश्रितो॥
यत्रराशिसुनावुक्तोतत्रपुंग्रहाआद्याः॥यत्रस्त्रीदृक्काणास्तत्रनरदृक्काणाः यत्रस्त्रीनवांशास्तत्रनरनवां
शाः यत्रस्त्रीराशिस्तत्रनरराशिरिति॥एवमनेनविधिनाउक्तयोगेस्वकालेपापवरोपलब्धिर्ज्ञेयेति॥
अथनिमित्तानि॥प्रश्नलक्षणानैप्रश्नकालेलिंगिनः कायालिकाः बालकाः धूलिक्षाः॥पक्षिणः छागदृ
क्तुरंगादयः॥अभूतिग्रहणाद्दिक्कुक्कोभनादीनांग्रहणं तेषांयदिंगितंचेष्टितंतद्धूवरस्यतथैवप्र
तिपत्तव्यं॥उद्दिश्यजयंनिश्चये॥निश्चयुनर्वस्तोनेक्षत्रद्वंद्वदृश्यत्रऽतरेतरयोगद्वंद्वकत्वज्ञापकात्सप्तमो
पिद्वंद्वोविभाषयाएकवत्स्यात्॥अतोवधूवरस्यैकत्वं॥अथवधूवरप्रश्नकालेशुभाशुभयोग
माह॥अभ्युदयादमृतरोचिषिचंद्रमसिषष्ठेसप्तमस्थेवासतिअयमेकश्चंद्रकृतोयोगः तत्रतस्मि
न्चंद्रमसिमूर्तौलग्नस्थेसति॥अथवाभयसमन्वितेयः॥भौमःकुटिकोशहितेऽधिकृतेस्त्रीभ्योद्वि
कः॥तस्मिन्भौमेमदनेसृष्टिसप्तमस्थेचसति॥चःसमुच्चये॥अयंचंद्रभौमकृतोद्वितीयोयोगः॥
तत्रस्तयोर्लग्नसप्तमयोरशुभसंगतयोः पापग्रहयुक्तयोःसतोः॥अयंपापयकृतोद्वितीयोयोगः॥यो





दशमयोगेऽकजातूवसुमहीसुनिसंमितेदेवरस्यभ्रातास्यात्॥अथमयोगेऽष्टमेवर्षेद्वितीयेऽब्दवर्षेत्रि
तीयसप्तमवर्षेइत्यर्थः॥जामित्रगोविधुसितोविधनाभसाध्वीसौरिःकुजोऽसुरमहेज्यविधीधनाग
ह्यौ॥धीधयिषंवपुषिसुप्रसवांप्रसूतोस्त्रीजातकोऽकमरिवेश्वलुचिंसमत्र॥५॥जामित्रगोसप्तम
विधुसितोचंद्रशुक्रोवधूंविधनांकुरुतः॥सौरिःज्ञानिःकुजोभौमःजामित्रगःप्रसाध्वींदुराचारां
करोति॥ज्ञोनकीयेतुशनिर्मृतअजांभौमोमारणयुक्तोमिति॥तथापिफलंदुष्टमेव॥महांश्चासौइ
ज्यश्चमहेज्यःअसुराणांमहेज्यःशुक्रबुधःप्रसिधःतोजामित्रगोधनाढ्यांकुरुतः॥वपुषिलग्न
स्थितोदीर्घयिषंकुरुतः॥प्रसूतोपंचमस्थितोसुप्रसवांशुभसंततिंकुर्यादित्यर्थः॥कुत्रचित्सुरमहेज्य
तिपाठः॥तदसत्॥यतआहज्ञोनकः॥यदिपृच्छकलग्नस्थोभृगुसोम्योजीवोवाकुरुतः॥पंचमस्थोवा
पुत्रान्जामित्रगोविपुलंधनमिति॥अस्मिन्वधूवरप्रश्नकालेस्त्रीजातकोऽकमरिवेशुभाशु
भाशुभंचिंत्यं॥एवंकालावरोपलब्धिमुक्त्वानल्पसंततिदर्शनकंउद्वाहविवाहकृत्सुशुभकाल्व
माह॥नक्षत्रतिथिवारफलानिपदेपदेविरचितानिपदेपदेतिनाचिरं॥सकलकर्मसुयानवधूक्रमा
न्महिविवाहमपरंशुभेदिने॥६॥इनविलंबितं॥दर्शनकंउद्वाहादिषुसकलकर्मसुभनक्षत्रतिथिवारफ
लानिनक्षत्रादिफलानिपरेऽन्यःपदेपदेविरचितानि॥पदेपदेइतिलोकेकाभिप्रायपोनौ॥अ

स्पृक्तेष्वपि पृथक्फलानि विद्योषाभावेऽप्युक्तानीत्यर्थः॥ तानि पृथक्फलानीति कारणादस्माभिर्नो
चिरेनोक्तानि। केचित्सरोक्षाभानेऽपि स्तनमात्रेलिटमिच्छंति॥ तथाचमुग्धबोधे॥ भवद्भूतभव्ये
षुक्यादयश्चयश्चिन्नइति॥ अतएवरसाद्यादिप्रयोगाः॥ हारायांवराहमिहिरोरुचिरांचकारेति॥
उदयनस्यापि॥ आतेनेकीरणावल्लीमुदयनइति॥ इतीतिकृत्यं॥ हियस्मात्कारणात्तदुपक्रम
स्तेषांसकलकर्मणांदहनकंडनादीनांयउपक्रमआरंभः सविवाहेविवाहनक्षत्रेएवशुभदो
नस्यात्॥ शुभेऽतीपातविष्कादिमहादोषरहिते॥ षएनब्भिर्दिवसैश्चतुर्थेतइतिनिषधाद्
ग्रहैश्च॥ तथाचश्रीपतिः॥ विवाहकृत्यंनिखिलंविवाहभवितोकथेन्नात्रबलंहिमद्युतेः॥ नवे
त्रिषष्ठोऽपिचनारकैःशुभइति॥ अथनिजकृतस्यास्यविवाहपटलस्यपूर्वेभ्योवैशिष्ट्यमाह॥
प्रायोविवाहपटलंतटलंबमानस्तंबोपमंनसहतेनयचालनानि॥ दृष्टावनेपरमतातपपीड्य
मानेदृष्टावनेनुसुरसैरतिहसन्मतिश्रीः॥ ७॥ वसंततिलका॥ प्रायोवाहुल्येनविवाहपटलंवि
वाहफलेसमूहः नयेनतद्धंचनचालनानिनसहते॥ हेतादिनाचालयितुंनशक्यते॥ आगमसि
द्धोदृष्टिभानः॥ अत्रविशेषणाहारणेदृष्टांतः॥ तटेति॥ तटेनदीनप्रलंबमानःअतिशिथिलमूलो
यस्तंबस्तृणस्तंबतेनोपमीयतेननथा॥ यथानटस्थेलंबमानस्तृणस्तंबोनचालनंसहतेचा

लितेसत्यःपतनमेवतद्विवाहपटलंमन्ये॥ सर्थः॥ अतइहमयोक्तविवाहदृष्टावनेनास्मिन्विवाहपट
लेसन्मतिश्रीःसतांविदुषांमतिःबुद्धिःतस्याःसंपत्तेश्रीःरमतांसुखेनक्रीडतां॥ अत्रहेतुः॥ कथं
भूते॥ परमतेति॥ परेषांमतानिनदृष्टातपउल्लंघनेनपीड्यमानास्तेदृष्टंतदूषणानिनिराणयंतीतिथा
अयंभावः॥ यथाकश्चनत्रातपेपीड्यमानोवनेगत्वासुखेनरमतेतद्वत्सरमतेःपीड्यमानोऽस्मि
न्दृष्टावनेसुखंरमतामिति॥ अथांतेश्रीत्रयोगः समाप्तेऽलंकारेयथात्रैवातेप॥ ॥छ॥ ॥
थो॥ ॥इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरालजगन्नाथविरचितायांविवाह
दृष्टावनटीकायांविवाहदीपिकायांनरवधूप्रश्नाध्यायः॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
अथस्वेनंग्रंथनिपूर्वकंग्रंथालंकारमाह॥ अरडूरडूजमहर्षिनंदोविश्वावनंसेश्रुतितत्ववेदी॥
औदीच्यचारित्रपथप्रवक्तृजनार्दनोवाशिरचक्रवर्ती॥ ७॥ उपजातिः॥ भरद्वाजश्चासोमहा
र्षिश्चतस्यनंदोऽत्रभरद्वाजगोत्रेविश्वावनंसेऽत्रवतंसःकर्णपूरःविश्वस्मिन्नवतंसइवनतंसः
तस्मिन्विश्वनंद्यइत्यर्थः॥ जनार्दनोनामग्रंथकर्ता॥ कथंभूतः॥ श्रुतीति॥ श्रुतीनांवेदानांतत्त्वं
यथार्थंतद्वेत्तीतितथा॥ औदीच्याउदीच्यजातिजनाःतेषुमध्येदृष्टांतयानेकविधाःप्रसिद्धाःतेषांचारि
त्रंचारःसएवपंथामार्गःतंप्रवक्तुंशीलंयस्यतीतितथा॥ औदीच्याचारेमार्गप्रवक्तृकइत्यर्थः॥ अनेनस्वधर्मो

पासक इतिसूचितं ॥याज्ञिके षुचक्रवर्त्तिवचक्रवर्त्ति श्रेष्ठतमइत्यर्थः॥ ॥अस्तिक्रियादिसइतिहि
तीयः समनस्यसूनुः क्रियादिसइतिहितीयः॥त्रिस्कंधपारंगतरंगमल्लस्तदात्मजोराणगइतुर्यः॥
२॥तस्यजनार्दनस्याहितीयः सूनुः क्रियादिसइसक्तिसः॥आसीत्॥इति असूर्यनामसाह॥कइव॥
क्रियादीपाख्याद्दिसइव॥तस्याक्रियादिसस्यआत्मजउर्वीयराणगइत्यासीत्॥उर्वीयनइस्कउर्वीय
कथनीयनस्मिन्नर्थेनियावत्॥राणगनामेसर्थः॥कथंभूतः॥त्रिस्कंधेति॥त्रिस्कंधाःहोरागणि
तसंहितास्तेषांपारंगता अत्रशेषज्ञानात्तेषारंगेयुद्धेमल्लइवमल्लः मल्लोबाहुयुद्धकु
शलः॥त्रिस्कंधज्योतिःशास्त्रविदांपराभवहृदित्यर्थः॥श्रीकेशवःसुकविरध्ययनाध्वनीन
मूहात्रतापथितुमर्थपथःप्रवाहेः॥देवज्ञराणगसुतःसुतपश्चयेऽस्मिन्नृद्दावनेमुनिग
वीनिबहंदुदोह॥२॥वसंततिलकावृत्तं॥अस्यैवदेवज्ञराणगसूनोस्यसुतःश्रीकेशवःसुकविरा
जनकस्मिन्नृद्दावनेसुतपःश्रयेमुनिगवीनिबहंदुदोह॥सुतयोगअइवमुनिगव्यः॥
उपमितआत्रेतितसुरुषः॥शारतद्धितकुकिंतेइत्यू॥टिलाच्चड्डीषु॥तासांनिबहःसमूहःतंदु
दोहदुग्धवान्॥किमर्थं॥अध्ययनाध्वनीन्मूहात्मूहान्अर्थपथःप्रवाहेः प्रतापथितुं॥अध्ययनस्य
अध्वाअध्ययनाध्वातमलंगा =ध्वनी= मिनइअध्ययनाध्वनीना॥अध्ययनमार्गज्ञानरी

श्री
॥९४॥

क्षाः॥अध्यध्वनोयत्वविसळंगामीसर्थेवआत्माध्वनोरेवइति॥अतःप्रकृतिंतेषांमूहाःसमू
हानअर्थपथइवअर्थपथःतस्यप्रवाहाःओघाःतैःसुष्ठुतर्पायेषांतेसुतपसरःसुपुण्याःतै
श्रीयतेसेवनेतनथा॥अत्रायश्लेषः॥सुतपोभिःसेवमानेवनेअध्वगमनेनविघ्नानपथः
प्रवाहेःतर्पयितुंगवोदुग्धंतेतद्वत्सुपुण्यैःसेवमानेस्मिन्नृद्दावनेनाम्निग्रंथेअध्वग्रंथाध्वय
नेनर्थप्रवाहैस्तर्पयितुंमुनयोदुग्धाइति॥तद्वनेभ्यःसारंसंगृहीतमित्यर्थः॥अतएतत्सुते
भएवशोभयिष्यतिकथमइतेभ्यइत्याशंक्याहः॥अबहुदृष्टेधियःकियद्दृष्टःपदग
भीरमधीरमिरंस्यते॥विषदशास्त्रधियांविदमेकदाश्रुतगतंरसनासुनिवृत्स्यति॥५॥
कुतमिलेखितं॥नबहुदृष्टंययासाअबहुदृष्टाबाधीर्यस्यासोअबहुदृष्टधीःतस्यअल्प
दृष्टशास्त्रस्यअदृष्टदृष्टिकियन्तंकिंपरिमाणंयस्यतिकियन्॥विशिष्टगुणमप्येतन्नस्यन
किंचिदितिभावः॥अधीरबुद्धीःअतिरंस्यतेअतिरामंप्राप्स्यति॥अत्रनिशेषणद्वारहेतुः॥
यदितिपदैःगभीरंपदगभीरं॥अतिमंदबुद्धिस्तुपअर्थज्ञानानुत्रपदगंभीरंनादेयाद्वा
दयिष्यतीत्यर्थः॥विषदशास्त्रधियांतुनुविशेषः॥विषदाअसंधिकाशास्त्रेधीर्येषांतेतथा

नेषांनुइदमेवकदाएकवारमेवश्रुतिगतंकर्णाभ्यांरसनासुज्झिक्षुद्वत्स्यतेहङ्ग्राह्य
त्ति।गौत्सरसनासुविद्वत्स्यतेगतं---कस्यापिनोच्यते।इदंकर्णपथेगतंसद्रसनासुविद्व
त्स्यतिइतिरुच्यतिश्रुयोक्तिः।उक्तंहिभर्तृहरिणा।अज्ञःसुखमाराध्यःसुखतरमाराध्य
तेविशेषज्ञः।ज्ञानलवदुर्विदग्धंब्रह्मापितंनरंनरंजयतीति॥इतिग्रंथालंकारः॥
अत्रग्रंथकृदुक्तयुक्तिमत्प्रमाणांसारग्राह्यसम्यक्कृतस्तत्रापिमरुद्विरोधिकुरुचिद्व
र्यदृश्यतेवोद्धृतं॥सद्युक्त्यानुनिरस्यसारमुदितंतत्क्षम्यतांसज्जनैर्नोस्माद्दृश्यसवना
व्रतीतिरिहनेस्यान्नोनरासंविना॥१॥पश्चात्सागरपूर्वनर्तिनटगोग्रामेत्रनंद्याहिमरंभा
पूगरसालशीर्षनिचुलछायाविनानेयसत्॥नानाशास्त्रकलापचतुरःश्रीकेशवस्यात्म
जश्चक्रेकांयुक्तिमतींगणेशविबुधोवृंदावनस्याक्षरान्॥२॥रसनगमनुतुल्ये१४७६
शाकेआनंदवर्षेविवृतिमकृतग्रास्तारदीपिकारमांगणेशः॥यद्दृलिखितमत्यानत्य
क्तंवासदोषंतदतिविमलचोक्तिःशोध्यमिसर्थयेतान्॥२॥ ॥छ॥ ॥छ॥ ॥छ॥

इतिश्रीसकलागमाचार्यवर्यश्रीकेशवसांवत्सरात्मजगणेशविरचितायांबृहद्दै
वज्ञदीपिकारमासमाप्ता॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥
ग्रंथसंख्या२००॥ ॥छ॥ ॥शकें१९२० बहुधान्यसंवत्सरेउदगयनेपौषशुक्ल
त्रयोदश्यांभौमेश्रीमत्सासवडनगरवरनसतिश्रीमदाचार्यान्वयजनितश्रीप
तिज्योतिर्विदनुजेनमल्लारिणालिखितेयंबृहद्दीपिकास्वार्थपरोपकारार्थंच।
तस्यैवेयंनाम्नस्य॥ ॥श्री॥ ॥स॥ ॥दा॥ ॥शि॥ ॥व॥ ॥अ॥ ॥स॥ ॥न्न

१ मंगलाचरणं
१ नक्षत्रशुद्धिप्रकरणं१
७ चक्रंकालमीमां
साध्यायः२
२० मेलकाध्यायः१
२१ नवांशचिंताध्यायः४
२८ ग्रहबलाध्यायः५
लग्नबलाध्याय१)
४१ चंद्रबलविचारः
५२ राहुसूताध्यायः
५४ षड्वर्गादिशुभ
धिकाराध्यायः
६४ गोधूलिकलग्न
विशोधनाध्यायः
६७ मासगोचराध्यायः
७० ग्रहयोगाध्यायः
७१ प्रतिष्ठानेग्रहा
गोचरशुद्धिकथनं
७७ ग्रहबलाध्यायः
८२ सामुद्रिकपर्यंत
मिश्राध्यायः
९१ वधूवरप्रश्नाध्यायः
९४ ग्रंथालंकारः
१५ पृष्टिः

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ विवाहदीपिका समाप्ता ॥

श्री
॥ २६ ॥